Viśva Guna darsana

বিশ্বগুণ দর্শনং। —

॥ अथविश्वगुणादर्शः प्रारभ्यते ॥

॥श्रीगणेशाय नमः॥ श्रीराजीवाक्षवक्षस्स्थलनिलयरमाहस्तवास्तव्यलोलल्लीलाब्जालि ... सरंती मधुरमधुझरी नाभिपद्मे मुरारेः॥ अस्तोकं
लोकमात्राहि मुगमुखविशिशोरानने घ्वर्ण्यमाणं शांखश्रांतेन दिव्यं पय इति विबुधैः शंक्यमानं पुनातु॥१॥ कांचीमंडलमंडनस्य मखिनः क
र्णाटभूभृद्गुरोस्तातार्यस्य दिगंतक्रांतयशसो यं भागिनेयं विदुः॥ अस्तोकाध्वरकर्तुरप्पयगुरोरस्यैष विद्वन्मणेः पुत्रः श्रीरघुनाथदीक्षित
कविः पूर्णो गुणैरेधते॥२॥ तत्सूनुस्तु कवेदांततंत्रव्याकृतिचिंतकः॥ व्यंक्ते विश्वगुणादर्शं विधत्ते वेंकटाध्वरी॥३॥ पद्यं पद्यपि विद्यते बहु सतां हृद्यं
विगर्यं न तद्वद्यं च प्रतिपद्यते न विजहत्पद्यं बुधाः स्वाद्यताम्। आधत्ते हि तयोः प्रयोग उभयोरामोदभूमोदयं संगः कस्य हि न स्वदेत मनसे माध्वीकमृद्वीक
योः॥४॥ विश्वावलोकस्पृहया कदाचिद्विमानमारुह्य समानरूपम्॥ कृशानुविश्वावसुनामधेयं गंधर्वयुग्मं गगने चचार॥५॥ तत्र तु॥ कृशानुरकृशा
नुः पुरोभागिपदं गतः। विश्वावसुर्भूष्विश्वगुणग्रहणकौतुकी॥६॥ अथ पुरतः समापतंतमरविंदबांधवमवलोक्य नवदते नमागमसागरपारदृश्वा
विश्वावसुः॥ कूलंकषप्रताप जगद्गुरवे कोकसततेः। छायाविधौ कलोलापक्षात्सज्योतिषे नमः॥७॥ कृशानुः॥ सखे कथं सकलभुवनशोषकारिणं त
पनमपि नमनकर्मी करोषि॥ पश्य॥ पांथान्दीनानहह वसुमानातपांधान्विधत्ते शुष्कां पृथ्वीं रचयति तरां शोषयत्योषधीश्च॥ कासाराणां ह्र
तिविभवं क्रांतपूर्तिप्रदानां क्रूरस्यैवं गुणलवकथा कास्वतो भास्वतोऽस्य॥८॥ विश्वावसुः॥ किमरे भगवंतमरविंदबांधवमपि विनिंदसि।
शृणु पुरोभागीन॥ वृष्टिं वृष्टिभिरारचय्य जगतस्तुष्टिं सरीसर्ति यः पुष्टिं द्राग्विदधाति दृष्टिषु नृणां ध्वांतं पिनष्टि स्थिरम्॥ माज्ञानोपपवर्गमार्गद
मपुपद्मोपहोल्लासिनं कोनस्तौति समस्तलोकस्य हृदं यो भूषणं पूषणम्॥९॥ किंच॥ यदानपश्यपतितमोविमर्दिनं रविं जनास्तत्कथयंति दुर्दिनम्॥ धु
नोत्यसौ देहभृतां सरोगतां धिनोति चांभोजततिं सरोगताम्॥१०॥ अपि च॥ ॥टि० १ पद्म २ ब्राह्मणः ३ मधु ४ द्राक्षा ५ सहसंबंधसादृश्यं योगेपयस्मृद्धि
... वचनात् सहसमृद्धमानं यस्य ताहृशं रूपं यस्य तन्मानेन पूजया सहितं रूपं यस्य तत् ६ दोषैकदृक् ७ सूर्य ८ विलासः ९ जलशोषकारिणं लोकस्य परोगकारिणं
... कमलाकासारसंबंधिनीम्॥

आशापालेषु पाशायुध यम बलभिन्मारुतेशादिकेषु प्रायो भूयः कृशानुः स्वपिति वशंवदितया भास्कराभूसुराद्याः ॥ यस्मै काले च येपि प्रतिदिवसमृषी
कुर्वते घर्म्यदानं सैषा त्रय्येव विद्यातपतिरविमयी सर्वलोकान् पुनाना ॥ १ ॥ कृतत्रिदशपोषणं कृशरथागसंतोषणं पिशाचकुलभीषणं पृथुतमःप्र
तपेषणम् ॥ विनम्रगदशोषणं विहितवारिजोन्मेषणं नमस्कुरुत पूषणं न नु नभस्थलीभूषणम् ॥ २ ॥ विश्वावसुः विभावसुमभिष्टुवन् भजे लिकुच
शानुना सह हृद्यत्वं शात्मानं समयागमयामास विमानमानमञ्च तद्धि बमध्यधामानमतिमा नमहिमानं परमात्मानम् ॥ प्रशस्तगुणविभवे प्रपद्य न
स्पृशां बंधवैरस्वतो यहतपाप्मने सकलदेहिनामात्मने ॥ नमः कमलवासिनीनयनसौख्यसंधायिने तमःशमविधायिने तरणिमंडलस्थायिने ॥ ३ ॥
पुनः सभक्त्युन्मेषम् ॥ भानुं भानुदलदब्जलोचनं भक्तलोकभवपाशमोचनम् धामतामरसवासिनीसखं हेमवर्णमिह सौ तिमेरु रस्ख ॥ १४ ॥ कृशा
नुः किमरे केवलमिति [illegible] नारायणो भवता विवेकलाभवता पि स्तवनभाजनीक्रियते । तथाहि स्वेनादौ सकलं जगद्धि शृंखितं स्वेन वर्षसे रक्षितं भिं
न्हे तमुकुंदएव विधृतानेकोहिविंदोचितः ॥ उत्पाद्य स्वयमुत्तमान्फलतरूनुल्लास्य चारूदके रुन्मत्तोपि किमुच्छिनत्ति जगति छित्वापि किं नद्रुति ॥ १५ ॥
किंच ॥ स्वानुज्ञामनवाप्य दर्पभरतः स्वाज्ञां विलंघेत यस्तस्यैवेह तनोति लौकिकनृपश्चंडोपि दंडं रुषा ॥ अंतर्याम्यपथे प्रवर्त्य भविनो हंत स्वयं
मारके यस्त्वान्पातयति क्रुधा स तु न किं नारायणो निर्घृणः ॥ १६ ॥ विश्वावसुः ॥ अहोबत मतिरेतिस्थूला ॥ यतः परमकारुणिके भगवंतं पंकजवासिनी
प्राणनाथमपि स्पृशति तत्तवापोलेभः ॥ आकर्णय ॥ चिरायसंसृत्यद धौ समज्जुनं नमज्जनं मज्जनं स्वयधोसजः ॥ दयापयोधिः परिगृह्य दुर्लभं भवि
जं पदं प्रापयति स्वयं प्रभुः ॥ १७ ॥ किंच ॥ लीलालोलतमां रमामगणयन्नीत्वा मनाक्कूपनं मुंचन्किंचमहीमदीश्वरमयं मंचं हठाद्वैनतेयं
त्यजन्नि जराजमप्यतिजवाद्द्राहंतलोकांतराज्जो पुंशोमिरुदितरत्वरंरु दे द्राहुग्रहार्तं गजम् ॥ १८ ॥ अपिच ॥ वैकुंठोमह सा हता विलमसारं

१ निकटमनैषीत् २ अतिशयमहिमानम् ३ सूर्यकिरणविकासितकमललोचनम् ४ लक्ष्मीसखं श्रीनारायणं [illegible] तेजः ५ सूक्ष्मान भवतीत्यर्थः ६ निंदा ७ अक [illegible]
कांतर्गता ॥

मंमंदेनोच्चैश्चंडरवंडपितुं हिरण्यकशिपुं वेतंडमुत्कंठया। सैंहं वेषमशेषभीषणमहो गृ[illegible]स्त्वरागौरवात्प्रह्लादव्यसनासहिष्णुहृदयात्
कंठकंठीरवः॥१९॥ अन्यच्च॥ अवेमव्यापाराकलनमतुरीस्पर्शमचिरादनुन्मीलत्तंतुप्रकरघटितेनाप्यसममसकृत्। विधीदत्तं चाप्यै विपदपन
यैकप्रणयिनः पटानां निर्माणं पतगपतिकेतो स्तवनुनः॥२०॥ अपरंच॥ काकैः शोकं व्यसृजदमितं हृद्गृध्रोप्यनेकाननुलोकान्हंहो भेकुः शलभमगमाक्षि
विषादं विषादः॥ राज्यं प्राप्तो कपिनिशिचरो राघवत्वे मुरारेः पारेवाचां जयति करुणापूरमप्यासस्वस्य॥२१॥ तदेवं दैवपरिवृढे तस्मिन्स्वापन्ने
धावप्युपन्यस्तनैर्घृण्यं तव तावदनैपुण्यमपुण्यफलं बुद्धेः पिशुनयति शृणु तावत्॥ जीवानां हर्षत्समिवत्त्वमिषेता स्वर्गापवर्गावहं देहं दत्तवनिवि
यः प्रियतमेनैवोपकारस्मृतिः॥ दुःखे जातिचिदागते स्वकलिताहुष्कर्मणः पक्तिमात्राथेदं बनिरागसि व्यसनिभिर्नैर्घृण्यमारोप्यते॥२२॥ हंतनेत
वः पामराः स्वापराधं परम कारुणिके तस्मिन्नघृण्य ध्यस्यति॥ क्लेशत्यागकृतेऽपि तेन करणव्यूहेन देहेन च स्वानर्थं बत जंतुरर्जयति चेन्मंतुनिंप
तुः कुतः॥ श्रास्त्रे श्रास्त्रमध्ये प्रनेजगुरुणा दत्तेऽपि ते नैव चेत्सुत्रोदेहितानिजं वपुः कथय रे तत्राऽपराधी तु कः॥२३॥ किंबहुना॥ आस्त्वं भूरि निजस्वरूपम
तपस्वाराधनायैव पुः स्वध्यानाय मनश्च शुद्धिमनघां लब्धुं च तीर्थादिकान्॥ तत्त्वान्यप्युपदेष्टुमुत्तमगुरून्दत्वानुगृह्णाति नः संसारे तदपि भ
ममयदि किं कुर्वीत सर्वेश्वरः॥२४॥ इति परिक्रामन्किंचिदंतरमपसृत्याधस्तादवलोकयच्च॥ सखे सकलपुरुषार्थसाधनानुष्ठानैकहेतुभूतं तावदव
लोकय भूलोकम्॥ सबहुमानम्॥ स्वर्गौकोभिरदोनिवासिपुरुषारब्धातिशुद्धाध्वरस्वाहाकारवषट्क्रियोत्थममृतं स्वादीय आदीयते॥ आम्नाय
प्रवणैरलंकृतिजुषः सुष्ठमनुष्यैः शुभैर्दिव्य क्षेत्रसरित्पवित्रवपुषे दिव्यै पृथिव्यै नमः॥२५॥ कृशानुः॥ सखे नाकगतोऽपि भवान्[illegible] अलोकन
मस्कर्तुमर्हति॥ जननमरणत्वाधिव्याधिप्रभेदशुभेराकलनमलिना लोकाः शोकातुराश्च भुवंगताः॥ नदिहमदिभिः स्फुटैः[illegible]

१ द्रौपदी २ क्रिमीः ३ इन्द्रकाकः ४ नटाप्रुः ५ प्रभो ६ द्रवतु अनिमिषतां पाषाणवद्चेतनानाम् ७ अपराधः ८ अशुभं ९ मर्त्ये॥ ॥

रैः॥ प्रभुभिरुदितसत्यैस्तिस्यैर्बुधः स्पृहयेतक॥२६॥ बालत्वे वा तरुणिमनि वा प्रायशो वार्धके वा मृत्वा मर्त्या वतयमभटैर्बध्यमाना नयन्ते
श्रेयस्तं वाममितविपदां जीवतां वा किमास्ते कस्मिन्ग्रामे पुनरनडुहां कर्षणक्लेशहानिः॥२७॥ विश्वावसुः॥ सत्यं तथापि मानुषाः [illegible]
प्रमानुषजन्म दूषणः॥ रामः सोमस्य दाता वभुवि ननु मनुजो रावणस्य प्रहर्ता तत्तावत्किं न मर्त्यस्त्रिदशकुलपतेरैस्य युद्धे सहायः। कृष्णोऽरण्ये
दैत्योद्धरननरतयानः श्रुतं किं त्वया सौ केते देवाः प्रभावात्स्वयमतिशयिता मानवा ह्यानवा वा॥२८॥ किंच॥ मांधाता च भगीरथश्च [illegible] रोमानुः
ककुत्स्थो रघुः पूरुः सोपि पुरूरवाः स च शिबिः पुण्यश्च रुक्मांगदः॥ वैदेहो नहुषश्च हैहयपतिर्वीरः [illegible] नलः पार्थो [illegible] नृपाः प्रशस्त-
यशसः प्रादुर्बभूवुर्न किम्॥२९॥ कृशानुः सार्धांगीकारम्॥ कामं जनाः केपि गुणाभिरामाः क्ष्मातले संति पुरांतरेषु॥ कलौ युगेस्मिन्गुणले-
शवंध्याः सर्वेपि सर्वेपि दोषभाजः॥३०॥ मंदेतरस्मरमलीमसमानसानां मन्युस्पृहादुरभिमानमदास्पदानाम्॥ [illegible] कलुषतः कलितो
दयानां दोषा यदृच्छिरपि दृश्यतरीश्वराणाम्॥३१॥ विश्वावसुः॥ तथापि सर्वकालकालिका अपि मानुषान् दूषणीयाः॥ यतः सर्वकालमपि संलोकसाध-
कः॥ पश्य॥ दुरितभरितशीलस्यापप्रसादनिपददयः कमलनयनस्वैरक्रीडागृहापितहृद्गुहाः॥ निगमपदवीनिर्वाहापर्याप्तवाग्बुद्धिताः स्वयं कृतिनः
कृतिनः संदृश्यन्ते कलावपि निर्मलाः॥३२॥ अथवा॥ यदि ते मदीयेव वसिन विश्रंभसंभवस्तर्हि तत्र तत्र संचारमारभ्य तत्तद्गुणप्रदर्शनेन करु
वाणीति विमानमग्रतः स्थापयन्नंगुल्या निर्दिश्य॥ इदं बदरिकाश्रमस्थलमिदं देवनारायणस्तपस्यति नमस्यवां स्थिरव मंदमः शौषयुन्॥ वि
[illegible]सिधिषणो निमिषद्दूषयवर्जनाः सज्जनाजनार्दनमहर्निशं भुजगमं चमं चं त्यमी॥३३॥ कृशानुः॥ सत्यं तवात्र गुणवर्णनासमर्थं तं न रोचतमस्य
॥ यदत्र जागर्ति शिलासमं हि मंक्षु शीतला गंधवहाश्च दुःसहाः॥ जलावगाहाच्च किलो जनैः [illegible] कुतस्त्वनुष्ठा स्यात्किमनिर्मलम्॥३४॥ किंच

१ इन्द्रस्य २ [illegible] ३ रघुः॥

१

क्वि ३

वस्कः॥अस्मदनुकूलमेतद्भवतिभवदुक्तम्॥परमहिमयुतत्वात्सा मवैकुंठसाम्यं पदमिदमु[illegible]तः पंडिताः शांतिमेव॥मुहुरिह समयेषु स्वान्तहेतोः
स्मरोगास्तदपि भृशमरोगास्त्वाम्र्यकेतोः प्रसादात्॥३५॥इतिविमानमन्यतः प्रस्थाप्य सांजलि[illegible]धम्॥साकेतायनमः पुरायप्रवतुलोकतरश्रीप
षेनानादोषमुषेतदंतरजुषेदेव्यैसरय्वैनमः॥येमीतत्तटभूमिषुप्रविलसद्रूपाश्चयूपास्थितास्तेभ्योमानुकुलीनकीर्तिलतिकोपघ्नायितेभ्योनमः॥३६
पुनः पुनर्निरीक्ष्य सभक्त्युन्मेषम्॥भवसागरशोषणेनपश्यच्चरणान्तःपुरजीवनौषधेन॥रजसा रघुनाथपादभाजा रचितां हः प्रशमामिमां नमामि
॥३७॥पुनः सानुस्मरणरोमांचकम्॥कल्याणोल्लाससीमाकलपतुकुशलंकालमेघाभिरामा काचित्साकेतधामा भवगहनगतिक्लांतिहारिप्रणामा
सीदर्पोद्धीणिकामाधृतजनकसुतासादरापांगधामादिक्षु प्रख्यातभूमादिविषदभिनुतादेवतारामनामा॥३८॥दशाननकुशयसेनत्रसदशेषलो
कव्यथाविलोपकरो[illegible]कोविवस्कमतीकृतावल्लभः॥कृपारसमपारसस्तुतिपयोनिधेस्तारकं हृषीष्ट सुकृषीष्ट कल्मषाणि तेकृतानिमयि॥३९॥अ
[illegible]॥सजय[illegible]त्रो यस्यपदि वरचरणपुष्करकरेणुः॥महिषीमृषिसिंहस्य प्राजीजनदीपरृषोर्द्येहेतुः॥४०॥[illegible]सिभूपासिषु हावल
न्धः प्रेयान्सर्पपाञ्जनकात्मजायाः॥काकायकेकायच पोदितेष्टदाशापक्षीशायचराक्षसाय॥४१॥अपिच॥अभीष्टघटकः स्मिता वतु रवीन्ति
कोदंडभागितिसमभिदं पुनः परममद्भुतं ब्रूमहे॥विधूतपरमीतिर्कोविघटितोस्विकः स्वयंसकुंभजनकप्रभुः शकलयां च मूल[illegible]॥४२॥ कृपानुः॥

१ परमहिमा विष्णुः पक्षे अतिशीतम् २ रोगसहिताः ३ सोचरगामिनश्च ३ अयोध्यायै ४ आश्रयदं डवत्तं जातेभ्यः ५ पक्ष्यगोचरणोयस्येति[illegible]धीमीत [illegible]तः पुनः[illegible]
तन्त्रीकंपापकत्वनिरास पूर्वकमानुषीकरणं तत्र औषधरूपं ६ लज्जितः ७ कुर्यात् ८ वरश्रेष्ठोयस्यचरणकमलसंबंधीरेणुः ९ ऋषिश्रेष्ठस्यगौतमस्यपत्नीमू १० अपः सुक्तं उक्
ष्टचरण[illegible]योगजः सिंहस्यमहिषीजनयामास हर्षोद्ध षभस्तस्योदये हेतुरितिचित्रम् ११ अभीष्टजनकः पक्षे अभीष्टो घटकः कुंभोयस्य १२ अतिकोरि[illegible]
भनुसारी[illegible]तेजः संजननद्रव्यं यस्येत्यनुसारीतिकः दंडभाक् इतिच्छेदः १३ परमपीडा पक्षे महिकारः १४ शत्रुसमुदायः पक्षे आरा[illegible]चकम् १५ [illegible] कुंभजनेन [illegible] ३

कथं नाम रामभद्रमनुचितकर्माणमध्येवमीडिषे॥ वर्षीयानपि जानकीसहचरो मातुः सपत्न्या मुदे संपन्नं रथहस्तिपत्तितुरगैः संयुक्तमध्यं राज्यं त्य-
जम्॥ विंद्न्हंतवनं वनं कृश्यमसौ न स्यादयुक्तक्रियो गव्यं दुग्धमपास्य पास्यति जनः को वा यवागूरसम्॥ ४३॥ किंच॥ धिक् त्वेवं ... नि
नं धीशालिने वालिने सीयं राक्षसवर्गनिग्रहकृते सुग्रीवमन्वग्रहीत्॥ तुंगप्रस्तरभंगलिप्सुरिह निःशंके नु टंकं त्यजन् संकल्पं कुरुते ... तिपंकनद-
लाटानप्रसंगायकः॥ ४४॥ कृत्वा सेतुं किल जलनिधौ खंडयित्वा दुरध्वानलब्ध्वा देवीं स्फुटविदितसंशुद्धिमग्निप्रवेशात्॥ भूयो ... पेनाभ्रक-
जननीं भूमिकेन्या मनन्यां मंतवेली मनयत वनं हंतपीले स्यहंता॥ ४५॥ विश्वावसुः॥ सर्वगुणेषु दोषाविष्कारं कथंकारम् ... सि॥ शुरावसत्यो-
क्तिनिरासहेतोः स्वराज्यमप्योषि स रामचन्द्रः॥ तृणायमेने निपुणो यतेन फणाभृदीशोपि पिपोपि तुतम्॥ ४६॥ किंच॥ वालिनि वैलोमिमालिनि ना
ग्नि सुग्रीव ... ॥ अस्य ... तिश वविदिवं सुव्यक्तं ते नुदीनबंधुत्वम्॥ ४७॥ किंच॥ लक्ष्मीवस्थसि विभ्रदप्यवि ... तरामाकृतिः श्रीपतिर्वै
निकामपि मानुषीमभिनन्दनी ... याम्॥ कल्याणीं तु वनीमनूनी नयद्दोकस्याप्यमृष्यन्वचो मेदिन्यामवलोकितः किमपरो मानी पुमानीदृ-
शः॥ ४८॥ वस्तुतस्तु॥ अतुंकरैरश्रितरामभद्रानुगणानृगुणानांगणनादरिद्रान्॥ प्राचेतसाद्याः कवयो नवद्याय देके द्शाक लनपि नेशाः॥ ४९॥
तथापि॥ तदीयगुणार्णवकणानामेकदेशलेशकोटितमांशुकलामात्रमिदमत्र भवता श्रोतव्यम्॥ काकुत्स्थकुलपयोधिकलशार्णवकौस्तुभः॥ कौ-
सल्याम्रुतनब्रातकल्पकप्रसवोदयः॥ ५०॥ प्रौढपंक्तिरथागारपरिष्कारहरिन्मणिः॥ जानकीलोचनद्वंद्वचकोरानन्दचंद्रमाः॥ ५१॥ संसारमार्ग-
संचारश्रांतच्छायामहीरुहः॥ सर्वपात्त्ववेतालसमुच्चाटनमान्त्रिकः॥ ५२॥ करुणारसकल्लोलपीयूषवरुणालयः॥ तपोधनजनाकांक्षातटाकाव न-
तोदयः॥ ५३॥ विश्वाविरहणोद्यानं विनयात्थानमंडपः॥ सौरभ्यप्रभवोत्कर्षसमावेशनिवेशनम्॥ ५४॥ टि०॥ १ कांजी २ सीता ३ नविद्यते न्योनुचरादिर्य-
स्यास्तामेकाकिनीमित्यर्थः ४ रावणः ५ समर्थो भाति ६ स्तोतुम् ७ अरण्ये ८ विपुलान् ९ क्षीरसमुद्रः १० ... ११ अलंकरणम् १२ समुद्रः १३ प्रभुत्वं प्रतापो वा॥ ॥

सौजन्यवादान्यकयोः सामानाधिकरण्यभूः॥ सौमुख्यमुख्यभवनं सौहार्दकावनादिका॥ ५५॥ [illegible]उद्भूतोत्साहशक्तीनामसाधारणजीविका॥ प्रसादल
क्ष्म्याः प्रासादः प्रसादस्य परागतिः॥ ५६॥ प्राणप्रतिष्ठा क्लिष्टानां प्रपन्नानां परायणम्॥ अनपायसौमुद्रीनामवगाहनदीर्घिका॥ ५७॥ जंभशासनजीव
नुर्नृन्मगेहं जयश्रियः॥ दुर्वारघोरमारीचस्वर्वीकरस्वगेश्वरः॥ ५८॥ नन्ताहूकृताटकादेहध्वान्तराजीवबांधवः॥ सुबाहुमत्तमातंगसंहारककेसरी॥ ५९
भार्गवग्रहदावाग्निपरिवर्जननिर्झरः॥ विराधासव्यदुर्दान्तकृविद्रावणमहौषधम्॥ ६०॥ खरदूषणकिंपाकखंडनैकपरश्वधः॥ दुर्मोचनीयमारीचकीच
कप्रबलअनलः॥ ६१॥ गृध्रराजस्पनाकादिलोकाक्रमणवर्त्तिनी॥ कबंधमयकासारकवलीकरणातपः॥ ६२॥ शबरीचित्तकल्हारशारदज्योत्स्निको
दयः॥ पावमानियशः काशप्रकाशशरदागमः॥ ६३॥ प्रगल्भवालिजीमूतप्रोत्सारणसमीरणः॥ सुग्रीवराज्यसामग्रीसूदिनं कानवौकसाम्॥ ६४॥
दुर्निरोधधुनीनाथजाड्यरोगचिकित्सकः॥ दुष्टनक्तंचरस्तोमधूमकेतुविजृंभणम्॥ ६५॥ कुंभकर्णमहांभोधिस्तंभने कुंभसंभवः॥ वृद्धयोरावणप्रा
णप्राणदलनो [illegible]॥ ६६॥ विभीषणस्यसाम्राज्यविश्राणनसुरद्रुमः॥ अयोध्यापुरनारीणामस्मोरत्यद्भुतोत्सवः॥ ६७॥ अभिषिक्तो यथावच्च वसि
ष्ठप्रमुखैर्महर्षिभिः॥ रमते सुमतेजस्वी रामः कामसमो हृदि॥ ६८॥ अत्र किल पवित्रचरित्रः कश्चिद्विपश्चिद्द्विजस्तमिममनुसंधत्ते॥ ध्यायामि रामम् अभिराम
गिरामरंदधारामदभ्रमिते रामम् अरे विरामम्॥ आराममद्भुततरामलसद्गुणानां घोरामयघ्नमसुरामरवंदितांघ्रिम्॥ ६९॥ द्यास्स मू[illegible]लये सुदीर्घिकानन
नेकाननेपलाशनपलायनप्रणयिका मुकेधार्मिके॥ समीरजसमीडिते प्रविश चित्त मे सत्तमे बलीकृतवलीमुखे मनुजधर्मिणि ब्रह्मणि॥ ७०॥ अप
स्त्रामास तृणं प्रिया दुहितृणामास स्मरारेर्धनुर्दारामास मुनेः शिलापि नृवरामास स्वयं पादुका। कुल्यामास महार्णवोपि कपयो धांव भूत्संतदा पोल

१ औदार्यम् २ इंद्रः ३ नीचनाश ४ रोगः ५ दुर्वासः ६ भार्गः ७ कबंधाख्यो दानवः ८ हनुमान् ९ यशोलक्ष्मणदर्भभेदः १० समुद्रः ११ विध्वंससूचकोत्पातप्रसरणे [illegible]
च १४ राज्ञे १५ प्राप्तभार्य १६ अधिकप्रीतियुक्तमुखे १७ राक्षसाः १८ हनुमान् १९ वानरः २० अत्यद्रवाचरन्तिस्म अस्मत्तं प्राप्तेत्यर्थः एवमग्रे तृणामासेत्यादिषु [illegible]

१

स्तोमशकोबभूवभावंस्त्वंमानुषीमासिषाः॥७१॥ अशिलाप्राणदपरैरचराचरमुक्तिदैः॥ असर्वभूताभयदैरशर्वधनुर्दनैः॥ ७२॥ अब्रह्मास्त्री[illegible]
ततृणैरतृणिकृतरावणैः॥ अलंकातरदैवैस्तैरलंकापुरसाधकैः॥७३॥ इतिविमानंदक्षिणतःप्रस्थाप्यकृशानुमुद्दिश्य॥ शिथिलितभवरके[illegible]
हवैकुंठपादाक्रांतविपदपनोदाकृतचित्तप्रमोदा॥ विमलतरतरंगाविश्रुतांभोधिसंगाविहितदुरितभंगावीक्ष्यतामत्रगंगा॥७४॥ कृशानुः॥ उपे
क्षणीयानिभागीरथीयानिपानीयानिकिमितिवीक्षणीयानि॥ यतः॥ येषांजनिश्चरणतस्तहिरण्यहेतुर्दोषाकरेणगुरुदारविदैनमूर्ध्नि॥ ब्रह्मांत
मागभिदएवसहस्थितिश्चरन्यातोलयोजलधौनिधौकिलगांगवाराम्॥७५॥ विश्वावसुः॥ शांतंपापंमंदमंतेकिमुकुंदपादारविंद[illegible]स्यंदिनीधुनीम
पिनिंदसि॥ पश्य॥ गांगानिवारिगरुडध्वजपादपद्माद्वाविर्बभूवुरपुनस्तुनरिंदुमौलिम्॥ निन्युर्विचित्रममृतंसगरान्वयंचनेतोधिकंभुविपवित्रंल
मंसमंवा॥ [illegible]किं[illegible]सामर्वतोमुखबनीतटिनीसुरोगांमूर्त्तिविधेरिवबिभेतिसरस्वतीच॥ भेदस्त्वियानबलिभिदश्चरणारविंदादाद्याबभूव
चरमाकिलनाभिपद्मात्॥७७॥ अपिच॥ भागीरथींप्राप्यबुधाःपितृभ्योजलांजलीन्सादरमर्पयंति॥ पापानिसर्वाणिततःपितृणांभवंत्यहो
दत्तजलांजलीनि॥७८॥ अन्यच्च॥ भागीरथींयःपदधीरुपास्तेयथाक्रतुन्यायतएषधन्यः॥ देवत्वमेत्यत्रिदिवेसुधायांभोगीरथीतिव्यपदे
शेमेति॥७९॥ सरस्वत्याश्लिष्टासवितृतनयालिंगितद्रुतरास्फुरद्दुग्धस्वच्छाप्रकृतिरिवभातित्रिगुणभाक्॥ तथाप्येषादोषापनयनपटुत्वात्क
लनयाप्रगल्भंसंसारंप्रशमयतिकंसारिपदभूः॥८०॥ किंच॥ गांभीर्येणगदाधरस्यहृदयंमाधुर्यतस्तुक्षिरंखेतिम्नाचयशस्तदीयमनघंशैत
ल्यतस्तत्कृपाम्॥ नैर्मल्यातिशयेनतस्यधिषणांनित्यप्रसादेनतद्वक्त्रंचानुसरंतितत्पदभुवोवाराशिरीराइमे॥८१॥ इतिबद्धांजलिरग्रतोःव

१ अदृश्यमहासमर्थैः २ निरासः ३ हिरण्यपक्षः सुवर्णंच ४ चंद्रः दुर्गुणमवनिश्च ५ शिवः ब्रह्मच ६ लेषेउभयोरैक्यात् [illegible]मपि ७ मोक्षः पीयूषंच ८ राजविशेषः विषयुक्तंच ९ ज
लवतीचतुर्दिगस्तिमुखवती १० रक्तिमाप्रीतिश्च ११ नदीवाणीच १२ विष्णुः १३ योयादृशींदेवतामुपास्ते[illegible]रूपंमाप्नोतीत्येषन्यायः १४ सुधायांभागीतिप्रोज्ज्वला १५ ख्या
तिव्यवहारंवा १६ माया १७ सत्वादयः १८ गंगा॥

लोक्यसानंदम्॥ काशीसकाशीभवदिंदुगेहसौधाग्रभागा बहुसंतिनागा॥ इंधेमयूखैर्विरियमध्येकारव्युत्पत्तिशून्याशिवशेखरेंदोः॥८२॥ कृशा-
नुः॥ वयस्य किमेषापितवस्तवास्पदम्॥ पश्यप॥ येमिष्टान्नभुजोगजोत्तमदृयारोहाः स्वगेहांतरेसत्काभिर्महिलाभिरत्रविरहंरूपा मुक्तमुक्तास्र-
जः॥ तेघोरास्थिधराविराजदनडुहा हा विषाहारिणो नर्त्तिष्यंस्यवशाः श्मशाननिलयानीचैः पिशाचैः समम्॥८३॥ काशीसुहृदेश्य॥ इत्तंसाधु सु-
दृश्यदेकमपि तत्क्षेत्रप्रभावाद्भवेत् कामं कोटिगुणं भवांतरइति ख्यातं त्वयि त्वास्थया॥ वासंप्राप्यसुदुर्लभं हि निदद्ततो वासांसि जन्मान्तरे लोका हे व-
भजंति दिग्वसनतां हे काशि शंभ्यो नमः॥८४॥ वाराणसि त्वयि सदैव सरोगभूमावारोग्यभूमिरिति काममलीकवाक्॥ संतस्तु षां भवति यत्र वपु-
स्थूलं जन्मान्तरेपि जन भाववदुत्तमांगम्॥८५॥ विश्वावसुः॥ अनिपुणधिषण गुणमपि किमिति दोषी करोषि॥ यदेतन्नगरवासिना भोगिनापि
योगिनामप्यप्राप्यं शिवसारूप्यमाप्यते॥ अङ्गे दृढमपवित्रमपास्य नन्वच्छमृच्छतितु वपुः किल यस्य॥ लोचनेषु विरवामनिटीले मस्तके हरिप-
दांबुजटीके॥८६॥ अंहः पुरवासिना मन्याप्येषा धन्यता॥ प्रदोषवक्त्रसत्त इह प्रदोषे नटो धकारिन्यपदेश्मेति॥ प्रकाश्य सूर्येष हितोरकोद्य हूर्णा-
न्नूणां कर्णनभः प्रदेशे॥८७॥ इति गंगातीरजनपदकृतत्तनमवेक्ष्य सांजलिबंधम्॥ प्रातःप्रातर्जान्हवीवारिभक्त्यागाहंगाढं [illegible] नित्यक्रियेभ्यः॥
पुण्यराद्यपूरुषं पूजयद्भ्यः पूतात्मभ्यो भूसुरेभ्यो नमोस्तु॥८८॥ कृशानुः॥ किमेतद्देशवासिनोपि ब्राह्मणाः केवलं कलिमा[illegible]कलितशास्त्री-
यस्वचर्याविपर्ययास्त्वया न मस्क्रियंते॥ पश्यतावत्स्वाग्रेणास्य काशीदेशीयजनस्य स्वचर्याविपर्यासम्॥ प्रातर्दंतकेतापूर्वोपरिजनकस्पृष्टान्ज-
डोरासमैरूढानूधारयते पटाननुदिनं धृत्वा बहिर्गच्छति॥ गत्वा म्लेच्छमुखाशुचीन्स्पृशति च स्पृष्ट्वापि न स्नात्यहो न स्नातो प्यय-

१ अन्व: २ अंधकारोपलब्धिरहिता ३ जन्मांतरे ४ श्रद्धया ५ नग्नत्वं अथच शिवत्वं ६ सरसा उदकेनाच्छतीतिसरोगा भूमिर्यस्यां तस्यां हे गंगायामिति र्थः शोभसहिता यत्र च
७ वासकर्तॄणां ८ आयुर्धरोगश्च ९ जलविशिष्टंडलयोरैक्याज्जलं च १० सुंदरं ११ अग्निः १२ अथवा संभासंनिटालं भाले यस्य तस्मिन् १३ जटायुक्ते १४ प्रदोषकाले नर्तनकर्त्री

भुंक्तेऽयं च चपलो भुंक्त्वापि न व्रीडति ॥ ८९ ॥ किंच ॥ शास्त्रैर्जीवति शास्त्रमुज्झति परं शूद्राद्गृह्णाति तैरं बुधिः स्नात्वा चाभ्यति देवताः स्नपयति स्वैरं पचत्योदनम् ॥ उच्छिष्टान्न बिभेति याति यवनैरुच्चावचैः संगतिं मातंगान्निकटं गतान गणयन् मार्गान्मुहुर्गाहते ॥ ९० ॥ अपि च ॥ नीचैर्दुर्यवनैः मुनीभिरपि वानिःशंकमालोकितं भुंक्ते पंक्तिविदूषकैः सह नरैरज्ञातवेदाक्षरैः ॥ मद्यास्वादनमत्तचित्तजननैस्तामोहाय भीह्यानितः कर्माण्याचरते श्रुतिस्मृतिवचोदूराण्यसाराण्यहो ॥ ९१ ॥ अपि च ॥ कन्यां काममपुत्रलुब्धप्रविजहद्दुर्दर्पयौवनामत्वगनां द्रव्याशापाशकृष्टो भ्रमति चिरतरं नूनदेशान्तरेषु ॥ अन्योन्याश्लेषवांछाविगलितवयसोरात्तमालिन्यमस्या दंपत्योर्व्यर्थकर्तवै हतविधिरुभयालोकयोः शोकयोगम् ॥ ९२ ॥ अपि च ॥ नाधीतेऽत्र जनो यदि क्वचिदधीते यते सहस्रेषु वा ॥ दुस्तर्केषु भ्राम्यति दूरीकुरुते श्रुतिस्मृतिसत्तर्कान् ॥ ९३ ॥ विस्मृतवस्तुः ॥ कष्टमरे ब्राह्मणनिंदां शृण्वतः कंपते मे हृदयम् ॥ यस्त्वयोपन्यस्तः सत्वर्णो विपर्यासः स एष कलेरेव दोषो न ब्राह्मणानाम् ॥ कलौ युगे कांते युगं चरित्रं कुत्र नाम संभाव्यते ॥ दुरितं कृतिं कोपध्वात्मा दुर्जेयः खलु कलिः ॥ यद्रूपा ह्मर्मस्थानमधर्मकर्मविततेर्दुर्मानमर्मासनं शास्त्रस्तोमललाटभूलिपिलयः शांतिः सवानामपि ॥ सर्वोन्मायवचः समापनदिनं संस्थासदाचारविधेर्यो शाजनिभूरभूदिह महानर्थो वहोऽयं कलिः ॥ ९४ ॥ एतादृशे कलियुगेऽपि शतेषु कश्चिज्ज्ञानाद्द्विजगति यः श्रुतिमार्ग एव ॥ यत्किंचिदाचरति पात्रमसौ सतीनां श्लाघ्यं मितापमपि किं न मरौ सरश्चेत् ॥ ९५ ॥ किंच ॥ येकायस्थ्यं जुनाश्चये नृपसभातायेच ह्रिंजाः शास्त्रिणस्ते यत्नादनुसृत्य निर्दयतया शुष्कांस्तुरुष्काधिपान् ॥ देवान्भूमिसुरांश्च पातिकृतिनस्ते चेन्नु धोऽस्मैस्ते ब्राह्मण्याय जलांजलिः किल भुवि प्राज्ञैः प्रदेयो भवेत् ॥ ९६ ॥ सर्वतो दृष्टिं प्रसार्य सश्लाघम् ॥ आक्रांतास्तव संधरास्तु पवनैरासेतु हेमाचलं विद्राणे क्षितिभृद्गणे विकरणे निद्राति नारायणे ॥ निर्विघ्नप्रसरे कलावपि बलान्निष्कंटकं वैदिकं पथानं किल तत्र नत्र परिपात्येको हि लोकान्तरः ॥ ९७ ॥ टी० ॥ १ दुर्जनः २ चांडालान् ३ भ्रष्टाः ४ जनसमूहः ५ विवाहितां कृत्वा ६ त्यजन् ७ आलिंगनम् ८ कृतयुगसंबंधि ९ पापवल्याश्रयः १० समाप्तिः ११ स्वल्पोदकम् १२ उदासीनाः भवेयुः १३ नष्टे ॥

पुनश्चवसश्लाघम्॥ त्यजतु विहितमेतद्देशवासी निषिद्धं भजतु तदपि लोके नास्ति धन्यस्ततोन्यः॥ त्रियुगपदनखश्रीदत्तशुद्धिर्यदंगे लगति दुरित
भंगो लग्नको गांगपूरः॥९८॥ प्रौढेषु गौडेषु च कान्यकुब्जेष्वंगेषु वंगेषु च मैथिलेषु॥ अन्येषु सत्स्वेव बुधेषु धन्यस्त्वद्यापि जीवंत्यधिभूमि विद्याः
॥९९॥ एवं तावदवधेहि॥ एतद्देशप्रचुरचरितान्यन्यदेशस्थितानां रोचंते चेन्न नु नमनसे मा कृच्चर्चा न हानिः॥ प्राज्ञाः पुत्राजननयितृहृदे
पश्यपहृत्सदंतेत दृष्टिहृन्नपरमनसे तावता कोत्र दोषः॥१००॥ किंच॥ प्रातः शीतजले निमज्ज्य विबुधानभ्यर्च्य पत्न्युच्चके रार्येः पर्युषितं तु ना
भ्यवहरत्यधः स्पर्धो पोष्यसौ॥ भोगे गोमयलिप्त एव पचते भुंक्ते ततोन्यत्र यन्नीतं तद्द्विजहाति भुक्तिनियमो दृष्टः क्व भूयानियान्॥१॥ इति वि
मानं दूरतः प्रस्थाप्य सांजलिबंधम्॥ भुवनकदनकुब्जहृद्गर्वः कुलिशायुधप्रचकितगिरिप्राणत्राणप्रतिष्ठितकीर्तये॥ प्रसृमरमरुन्नाकुर्वा
र्णवप्रणर्तितवीचये महितजनतामाहात्म्याय स्मै महोदधये नमः॥२॥ कृशानुः॥ प्रहासम्॥ पामरैरप्यपेयानां नीराणां परिपातरि॥ आश्रये जलजं
तूनामाभिनृसां कथं तव॥३॥ ममत्वं धमानपर्हंष घोषे रवल्वे तस्मिन्नरोधएव समुन्मिषति॥ सततं क्रंदते सर्वो दीप्यमानोदराग्नये॥ महापाय
समुद्राय दरिद्रायेव कुप्यति॥४॥ समृद्धोप्ययमपि लुब्धतया बुद्धिमद्भिरनादृत्यः॥ पश्य॥ रत्नाकरोपि चरमाभ्युदयालयोपि स्वर्णे स्थितीरधिग
तोपि वर्द्धमिकोपि॥ तादृग्घनोपचयपकृत्तरणिप्रचारान्नोपेत्य हंत वितरणित्वमसौ कदापि॥५॥ सृष्टिरेवास्य विफलेति मे दृष्टिः॥ तथाहि॥ नास्त्येषामुप
युक्तता तेस्तरोः सस्योपयोगः कुतो नरत्नानायच योग्यतास्य पयसो कानामपानार्हता॥ उद्गर्जंतमिमं तमंतकपितैर्दुर्जंतुभिर्भीषणं रत्नेषु सृष्टव

१ ऐश्वर्यषट्कसंपन्नः श्रीविष्णुः २ प्रतिभूः ३ अधिभूमिइतिच्छेदः भूमाविति तदर्थः ४ नाशः ५ स्थिरः ६ प्रशस्तगतिः ७ डलयोरैक्यादर्थद्वयम् ८ नमस्कारेच्छा ९ व
र्धमान १० कठोरशब्दे ११ दीप्यमानउदरे ऽग्निर्वडवानलो यस्य तस्मै पक्षे क्षुद्वशाद्दीप्यमानजठराग्नये १२ महापायसमुद्रायेतिच्छेदः महत्यः आपाय
स्येति पक्षे एकं पदं महनीया यस्य विषये मुद्रा याचनचिन्हम् यस्येति १३ सुवर्णम् जलं च १४ वीचयः अंगुलीयकानि च १५ संचयकर्तामेघोत्पादकश्च १६ ए
तत्वं नौकारहितत्वं च १७ अंतस्थितेः॥१ ब्रह्मणः॥

तोकस्याशापममुंकोवाशापः कथ्यताम्॥६॥ यस्य स्वर्णेऽपि पउरुतरानित्यमायात्यपत्नात्तनस्वापत्यनुगुणतया नक्रियेतव्ययश्चेत्॥ वन्हिग्रा
सो भवति किमितीमंथनंबधनंवा लक्ष्मीप्रेक्षो जगदधिपतेरत्रसास्मीसरस्वान्॥७॥ किं बहुना॥ कुंभजपीतोच्छिष्टं शिष्टैरस्पृष्टमर्णवमवेत्य॥ उ
त्रततृष्णोऽप्युदकं पांथजनोनैवगृह्णाति॥८॥ वि० सस्वेसर्वगुणाकरः सरित्पतिरेषनदूषणीयः॥ तथाहि॥ उच्चैःश्रवः प्रदातुर्दुःश्रवसेपुनस्त
त्तुजाये॥ वामविलोचनदातुर्वदान्यमस्माद्वदान्यमर्णवतः॥९॥ किंच॥ अमृतंविबुधेभ्योदाद्भीष्टफलदंतरुंचधेनुंच॥ द्विंवसनायसितांशुकं
मीक्षितएताहृशः क्वादाता॥१०॥ अमुष्यखलुभाग्यवत्तांशेषाद्योऽपिवक्तुमशक्ताः॥यस्य॥ जन्होरपत्यंजगतःपवित्रंकलत्रमब्धेस्तनयः
कलात्मा॥ कन्यातुधन्याकमलाबिभर्तिजामातृभावंजगदीशएव॥११॥ अन्यच्चैतदमस्यभागधेयम्॥ यत्तीरेपुरुषोत्तमस्थलमिदंयस्यास्मरःकि
नरश्रेष्ठैर्नित्यमधिष्ठितंभगवतःसान्निध्यमुख्यास्पदम्॥ अत्रत्यक्तवतामसून्करगतामुक्तिःस्तदास्तामहोदेहोर्दाहविनाकृतोऽप्यविकृ
तःकाष्ठादिवत्तिष्ठति॥१२॥ किंच॥ निवेदितस्यात्रमासखायनीचाहृतस्यापिकिलौदनस्य॥ भक्त्याशनंहंतुभवार्जितानांमहांहसांनाशनमा
मनंति॥१३॥ सभक्तुन्मेषम्॥ दारुणिसन्निहितायप्राग्नेदुतमश्नतेमखेषुहविः॥ शिशिरायनित्यरुचयेशुचयेरचयेयमद्भुतापनतीः॥१४॥ इति
नमस्कृत्यस्कंदरमन्यतोविमानंप्रस्थाप्यसश्लाघंसखेसएषः सर्वसंपदामास्पदंतयात्रिदशालयस्पर्द्धि शाडुवगुर्जरदेशमवस्कंदीभ्यस्वीकरो
ति॥ अत्रहि॥ सकर्पूरस्वादुक्रमुकनववीटीरसलसन्मुखाः सर्वश्लाघाः पदविविधदिव्यांबरधराः॥ लसद्रत्नाकल्पाघुमघुमितदेहाश्चघुसृणैर्यु

१ विष्णोः याचमान २ अगस्त्यः ३ एतन्नामकोश्वः उच्चैरतिशयितंकर्णद्वयंयस्य ४ इंद्रः बधिरश्च ५ विष्णुः बधिरबंधुश्च ६ स्त्रीरत्नंलक्ष्मीरूपं अथवा वामविलोचनं चंद्ररूपं तस्य दातु
र्मुंदरस्नेहं ७ दातारं ८ नग्नायशंकराय ९ चंद्रः वस्त्रंच १० जगन्नाथस्थानं ११ एतत्स्थाने शरीरं दाहं विनाऽप्यकृतमपिकाष्ठवच्छुष्यति १२ पवित्राय अग्नये च शी
तलत्वं नित्यरुचित्वं चास्मिन्नग्नावद्भुतत्वसंपादकम् १३ भूषणानि॥१४॥ अतिशयितसौगन्ध्यबोधकोऽलौकिकानुकरणशब्दः १५ काश्मीरजं केशर इति प्रसिद्धं

क्वानोमोदंते युवतिभिरमी तुल्यरतिभिः॥१५॥ अत्र वधूनामन्यादृशं सौंदर्यं॥ तप्तस्वर्णसवर्णमंगकमिदं ताम्रो मृदुश्चाधरः पाणी प्रासनवप्र
वालसरणी वाणी सुधाधोरणी॥ वक्त्रं वारिजमित्रमुत्पलदलश्रीसूचने लोचने केवा गुर्जरसुभ्रुवामवयवा पूर्नान मोहावहाः॥१६॥ कु०सत्य
मेवं तथापि न ते सारवस्तूपभोगचतुराः॥ तथाहि॥ क्रीडामारव्यतिकरवतीर्विद्युदाभाः कृशांगीः क्रीडायोग्येष्वदहसमयेगेहएवत्यजंतः
॥ नित्यासक्ता निरुपममणिश्रेणिवाणिज्यलाभे बभ्रम्यंते बहुतिनं परिप्राप्य देशांतरेषु॥१७॥ वि०॥ मंदमनीष सत्यं पुरुषाणां गुणविशेष
एव न तु दोषः॥ देशाद्देशे किमपि कुतुकाद्दृष्टुं तं लोकमानाः संपाद्यैवं द्रविणमतुलं सत्यभूपोप्यवाप्य॥ संयुज्यंते सुचिरविरहोत्कंठिताभिः स
तीभिः सौख्यं धन्याः किमपि दधतः सर्वसंपत्समृद्धाः॥१८॥ अनेवंभावो हि पुरुषाधमत्वमावेदयति॥ तथाहि॥ आकिंचन्याद्दतिपरिचयाज्ज्ञा
ययोपेक्ष्यमाणो भूपालानामननुसरणाद्धिभ्यदेवाखिलेभ्यः॥ गेहे तिष्ठन्नकुमतिरलसः कूपकूर्मः सधर्मा किं जानीते भुवनचरितं किं सुखं वा
पभुंक्ते॥१९॥ किंच॥ व्यापारांतरमुत्सृज्य वीक्षमाणो वधूमुखं॥ यो गृहेष्वेव निद्राति दरिद्राति स दुर्मतिः॥२०॥ इदं चावधार्यताम्॥ इच्छेद्यस्तु सु
खं निवृत्त मथ नीगच्छेत्स राज्ञः सभां कल्याणीं गिरमेव संसदि वदेत्कार्यं विदध्यात्कृती॥ अक्रुंशाद्दूनमर्जयेदधिपते राज्ञजेपेद्दूलुभान्नकुर्वी
त प्रकृतिजनस्य जनयेत्कस्यापि नापक्रियाम्॥२१॥ अन्यच्चेदमवधार्यताम्॥ अयुक्तं युक्तं वा यदभिहितमज्ञेन विभुना स्तकया देतन्नित्यं जडमपि
गुरुं तस्य विनुपात्॥ विर्वेत्सु नैस्पृत्यं कथमपि सभायामभिनयेत्स्व कार्यं संतुष्टेक्षितिभृति रहस्येव कथयेत्॥२२॥ इत्यलं प्रसक्तानुप्रसक्तयेति
दूरतो विमानमानयन् सांजलिबंधम्॥ कृष्णाश्लेषविशेषितासिततरुचे कालिंदि तुभ्यं नमः कुंज्येभ्यः श्रित तावकांबुकणिकापुंज्येभ्य एवांजलिः
॥ गोपीभ्यः परिरिप्सयामुररिपोस्तेषु स्थिताभ्यानती नो धायाभिरूपासिताय च नमो वाका नधीयीमहि॥२३॥ कु०॥ कुतं सर्वचोरजारशिरोम

१ पद्यंतः २ दारिद्र्यात् ३ वासं कर्तुं ४ वासं कर्तुमिच्छुः ५ आलिंगनेच्छा ६ नमस्कारोक्तीः

णेः कृष्णस्य जगदूतिसंधानुरनुसंधानेन॥ तथाहि॥ लुंठित्वा नवनीतमन्यसदने लोलेक्षणो भक्षयन् गोपीभिः परिगृह्य मातृसावधनाता मु
कुंदस्तया॥ लुंठेमीनवनीतमित्यभिहितोप्येतद्धलुंठीः किमित्युक्तोस्मा नवनीतमेव हृतमित्यो गोजनन्यामन्यधात्॥२४॥ किंच॥ अंसे सलीलं
विरेप्याश्रुकं स्वहस्तात् गोप्या भयाकुलदृशः कुतुकी मुकुंदः॥ अंसंगतं शुकमिहापनयेति वाचं तस्या निशम्य सततं दृशुकमाचकर्ष॥२५॥ अपि
च॥ नीत्वा राधिकया निशां मुररिपुः प्रातर्गृहानागतस्त्वं माभूरपराधिकः पुनरितिप्रोक्तोपि पूर्वं मया॥ कस्मादेवमभूरितिश्रितरुषा निर्भर्त्सितो
लीलया प्रत्यवदच्चैव सराधिकोहमितिता व्यामोहयन्मायया॥२६॥ वयस्यमैवं वादीः॥ सद्धिपरमपावनः सकलजगदुःसंहरणकृते कृतावता
रो वंदारुजनानंदनो यदुनंदनो निंदापदवीं दवीयान्॥ असत्स्वयार्थाभ्युदयस्य यस्य जगुश्चरित्रं जगतः पवित्रम्॥ पुनः परस्मै पुरुषाय तस्मै समस्त
नम्याय नमस्तनोमि॥२७॥ अस्य खल्वत्यद्भुतं चरितमाकर्ण्यताम्॥ चोरस्य चौर्यं जगति प्रतीतं चौर्यस्य चौर्येन तु दृष्टपूर्वम्॥ चौर्यं व्यकार्षीणि व
तश्रुतानि कृष्णस्य मुष्णन्ति तनुं स्मरंतमासि॥२८॥ किंच॥ चित्रं चित्रं जृंभिते कृष्णमेघे कंसग्रामाप्राप्यलोपं समृद्धिः॥ आसीद्युक्तं ह्यनिदाघप्रशां
तिहृत्सौहित्यमानसे कीर्तिरुच्या॥२९॥ पुनः सभक्त्युन्मेषं भगवंतमुद्दिश्य॥ कंसध्वंसयते मुरांतिरयते हंसं तथाहिंसते बाणं क्षीणयते बकंलघ
यते पौंड्रं परं लुंपते॥ भौमं क्षामयते बलाद्धलभिदो दर्पं पराकुर्वते तं क्लिष्टं म्लिष्टगणं प्रणम्रमवते कृष्णाय तुभ्यं नमः॥३०॥ इतिसुदूरं विमानमान
यन् वनेजनपदसरिद्गिरिप्रभृतीनवेक्ष्य सविस्मयमीश्वरमुद्दिश्य॥ कत्योषधीः कति तरून् कति वा महीध्रान् कत्यंबुधीन् कति नदीः कति पुंस
एतान्॥ कत्यंगनास्त्वमसृजः कति नाथ देशान् मन्येत वैष महिमा न हि मातिबुद्धौ॥३१॥ इत्यन्यतो गच्छन् सुरोवलोक्य सबहुमानम्॥ महाभा

१ वंचकस्य २ अपराधे ३ अमित्यक्षरेण युक्तं स्कंधसंबंधिनं च ४ अपराधी राधावियुक्तश्च ५ अभिवादकाः ६ दूरः ७ उदिते ८ स्वमातुलम् पक्षे कंउद
कम् तस्मिन् संप्राप्ता ९ हेतिखेदे अव्ययं पक्षे हानिदो यो अघासुरः १० असुरः हंसपक्षी च ११ यशः पंकश्च १२ उत्थिता॥ ॥ भ

ह्माभिर्व्योममधुरस्जलसान्द्रो निरुपमः प्रकाशो देशोऽयं स्फुरपुरनिकाशो विजरते॥ गृहस्था यत्रामी गुणजलधयः केऽपि विभवैः समृद्धाः अह्लातो मुहुरति
थिपूजां विदधते॥३२॥ क्र॰॥ सखे प्राक्कालीनचरित्रमधुना कथयसि॥ अधुना किल कलिमालिन्यादन्यादृशी रीतिरेतद्देशवासिनामासीत्॥ तथा
हि॥ अपारैर्व्यापारैरहरहरिहनयंतो शनदशा स्व थस्नाताः संध्यां विदधति न जातु स्वसमये॥ त्यजंतः स्वां वृत्तिं द्विजकुलभवां ग्रामगणकीभवंतो हं
तामीकथमपि च जीवंति बहवः॥३३॥ उपनयनविवाहा वृत्तवैकप्रधानौ कलिविभवतएषां कालभेदान भिन्नाः॥ विजहति नकदाचिद्वेदपाठेक
मो वयस्त्रिवर्षनामी वान्व नाभ्यासमेते॥३४॥ अत्तानाम विरामलौकिकवचोभाजाममीषां पुनर्मंत्रोच्चारण एव पर्यवसितं मौनव्रतं कर्मसु॥ ग्रा
पचपले नेनन पतां कालान शेषानहो पारंपर्यतईदृशामिह नृणां ब्राह्मण्यमन्यादृशम्॥३५॥ अन्यच्च॥ कुक्षेः पूर्त्यै यवनवितते भृत्यकृ
त्यानि कर्तुं विक्रीणीते वपुरपि निजं वेतनैरेन रास्ताम्॥ विप्रो भूत्वाप्यहह गणनानैपुणे वंचयित्वा स्वर्णस्तेयं रचयति जनः स्वामिनो पोषकाणा
म्॥३६॥ अहो वृत्तकलिमहिम्नासदसद्विवेकवैधुर्यमखिलजनानाम्॥ ये मुष्णंति निशि प्रविश्य भवनं ये वा बलात्काननं नैते स्वामिधनं हरंति
ननु ताश्चिंदतिचोरा इव॥ सद्यो हे तहरंति पोषकधनं संख्याविपर्यस्ययेक षृंतानपि वंचकानिह पुरस्कुर्वंति सर्वे जनाः॥३७॥ अयं खल्वनुपमो
वेदा इनिपुलत्वडुक्तमुक्तमेव यत्र स्वल्पेनापि यत्नेन सिद्ध्यनिम हती प्रतिष्ठा॥ वेदव्यासः सनत्वदशगुणो वेदवेदाक्षराणि श्लोकं त्वेकं परिपठतियः
स स्वपंजीव एव॥ आपस्तंबः सइह कलयेत्सम्यगौपासनं यः कष्टं शिष्टं क्षितिकृतिकलौ काश्यपमृच्छंति विद्याः॥३८॥ वि॰॥ किमरे भूस्कुरेष्वे
वृद्दोषमुद्दोषयसि॥ अद्यापि संति बहवः कलिताग्निहोत्राः शास्त्रार्थबोधकुशलाः किल शांतिमेतः॥ अंतर्मुखाः सततमात्मविदो महांतो नि
भूतवात्यविषयाद्विगमाध्वनिष्ठाः॥३९॥ अन्यच्च॥ श्रुषीभूताः स्नानैः कृतविहितपुराणाश्च नियमादपूतानां स्पर्शान्न बहितदद्दोसमीविज
हते॥ स्मराभ्यर्चीक त्वाश्रुषि कृतमदत्यन्नमनघं महाराष्ट्रे देशे विलसति महानेष द्विगुणः॥४०॥ टि॰ १वाचस्पतिः २स्मार्ताग्निं ३प्राप्नुवंति॥

किंच॥ वस्तूनियमनेनवाजनपदाधिकारेणवाद्विजव्रजनउपव्रजन्मभुपदं महाराष्ट्रजः॥ नवृनिमिह पालयेद्यद्विधास्तराणानंताभवद्यवनवाष्टन
भुवनमेनदब्राह्मणम्॥ ४१॥ यच्चदोषांतरंभवतापरिभाषिततदशेषमपिसाधुजनोपकारेणपरिहीयते॥ अलमंस्कसंहर्तुमहः सहस्त्रंस एको
पिविप्रप्रवेकोपकारः॥ कठोरःकुठारः किंलैकोपितिग्मोविनिर्भेत्तुमीष्टेविषदूननेकान्॥४२॥ कु०॥ अस्त्वेवमप्यत्रस्थानामाचेतरवर्णप्रभवाना
मपिपुनरतिदुःसहंचेष्टितम्॥ पद्युप॥ देशेदेशेलुपताः पर्यटंतोभंजंभंजंब्राह्मणादीनशेषान्॥ हारंहारंहंतसर्वस्वमेषांपापाएतेस्वोदरंपूरयंति
॥४३॥ विं०॥ सत्यमेवमथापिमहनीयमवंतेषामेवचेष्टितम्॥ तथाहि॥ मायाचंचुतयाभयावहगतिः प्रत्यर्थिपृथ्वीभुजांमाहाराष्ट्रभटच्छ
टारणपटुर्नोपपर्यटाल्पेतचेत॥ देवब्राह्मणवर्गनिग्रहकृतोदेशांस्तुरुष्कादमेनिष्प्रत्यूहमनोरथाविततनुर्निर्दैवभूमीस्फुरन्॥४४॥ ततः
श्च॥ हेक्षोणीसुर हितकृतेदारितम्लेच्छपंक्तेर्मत्यासंस्त्याकथमपिमहाराष्ट्रपृथ्व्यस्यचेष्टा॥ व्याधिव्यूहप्रतिकृतिकृतांव्यक्तमुग्रौषधानां
कायारोग्यक्षणपिहृदयैः कीटवंमर्षणीयं॥४५॥ इत्यन्यतोविमानंगमयन्नग्रतोविलोक्य॥ कद्मेवबहवःसमवेतामानुषामार्गानप्यथंन्यथं
ति॥ निपुणंनिरूप्य॥ सम्प्लाघम्॥ अंगान्वंगान्कलिंगानथमगधकुरून्कोसलान् केकयान्वाकाश्मीरान्कुंतलान्वायवनजनपदान्कि
त्रिपाचालसैक्स्य॥ नेपालान्केरलान्वाकतिचनकृतिनः पांड्यतुंडीरचोलान्कर्णाटान्गोडलाटान्प्रगीतिघटनालंपटाः पर्यटंति॥४६॥
कु०॥ अरेकिमेतान्निंदनीयानभिनंदसि॥ नानाजातिभवाद्मेकलिबलादेकीभवंतोनराविराग्याभिनयंचिराद्विदधतोवर्णाश्रमत्यागिनः॥ नि
र्तानघवैदिकप्रणयनानिष्किंचनवावचनाद्दक्षादिक्षुविदिक्षुकुक्षिभृतयेभिक्षाटनंकुर्वते॥४७॥ किंच॥ विस्मयचरिताविश्वामित्रादयः परर्षि
योद्धकुभिरतुलैर्ब्राह्मण्यंयत्तपोभिरुपार्जयन्॥ नहिहजहतोजन्मप्राप्तंत्रयीविमुखेष्वमीष्वहहकृतिचित्वाखंडेषुप्रविश्यहंताजनाः॥४८॥ टी०

१ प्रतितिरस्कृत्य२ क्षीरस्य३ क्षीणाः४ आत्मनेतर५ भंक्त्वाभंक्त्वा६ ताडयित्वा७ स्तुत्यं८ मोहजनकत्वेनपुण्यं९ निर्विघ्न१० मर्षणीया११ प्रतीकारः१२ कटुत्वं१३ संधीभूताः१४ संकुलान्कुर्वंति१५
परलोकसेपादनसक्ताः१६ वेदमार्गपराङ्मुखेषु॥

श्रि॰
९

वि०॥ कथमरे हरेर्भक्तेष्वमीषु सन्नेह्यसि दोषेभ्यो नैव भेतव्यं दृढा चेद्भक्तिरच्युते। तिमिरेभ्यो हि न भयं दीपश्चेल्लभ्यते महान्॥४९॥ किंच॥ दुःखंकज
न्मदुरितं बहुदामविद्यां हार्दं तमं हंति परमा हरिभक्तिरेका॥ एकोऽपि राघवशरः किल समतालान् शैलान् रसातलमपि त्वरया बिभेद॥५०॥ अ
पिच॥ धुनोति निविडं तमः परिलुनाति पापाटवीं तनोति च मनोरथानुपचिनोति नानोत्सवान्॥ अनन्तिकचरः पुनर्ननु मनः सुधानिर्झरैर्न्नं ने
त्ति परिपार्श्वसुमुक्षु गिरीशभक्तिः शुभम्॥५१॥ किंबहुना॥ पूतागानां पुण्यगंगादिसिंधुस्नानानां नानाक्षेत्रयात्रापराणाम्॥ दासागारापत्यवैरा
ग्यभाजां सीमा भिन्नो गाढरः कार्य एषाम्॥५२॥ इति विमानमन्यतः समानपन्निपुणं विभाव्य॥ सुशोभनक्रमकरैः सवितो जीवनार्थिभिः॥ मध्य
स्थ बाडवो भूत्वा मनस्तं प्रदेशं नदीशवत्॥५३॥ कृ०॥ अयेकिं प्रशंसस्यपयातमर्यादममुं देशम्॥ पश्य॥ ग्रामेग्रामे निवसति चिरात्स्वामिभावेन शू
द्रो भृत्यो भूत्वा पठति गणनां ब्राह्मणस्तस्य पार्श्वे॥ वेदाध्यायी सरइव मगौ क्वापि कश्चिद्यदि स्यात् तत्रामैत्रप्रकरकरणे च न्नतेसो नियुक्तः॥५४॥
किंच॥ महाराष्ट्रदृष्टा दोषा अत्राप्यतिदेष्टव्याः॥ विश्वावसुः॥ वयस्य मैवं वादीः॥ मानामयपक्ष तमरवे रनघैरिहामी माचाधिगीषत वचांसि चिरं
तनानि॥ देवेषु भक्तिरवनित्रिदशेषु चैषां विश्राणनं च विविधान् विधुनोति दोषान्॥५५॥ पश्यतावदेतेषां भाग्यवत्ताम्॥ येमावल्यातपनसूत
यारम्य हाराङ्कनयाल्हद्यास्तं गस्तनगिरिज्जुषो नाभिवापीमनोज्ञाः॥ भूमे भूर्नीरिवबसू सूनीर्भुंजते भाग्यवंतः क्षोणीपाला इव युवजनाः का
ममांध्रीपुरंध्रीः॥५६॥ शृणु तावत्॥ कोवाकल्पतरोर्गुणः सुमनसां यः स्वाश्रितानामहो सर्वांशान् हरतः प्रसह्य मधुपान् धत्ते महामोदतः॥ कर्णेल
दि०१ निहंतुं बहुपरिकरोभवसि २ दूरीकरोति ३ परिछिनत्ति ४ विस्तारयति ५ पुष्णाति ६ सिंचति ७ प्रकाशयति ८ परिपक्वम् ९ वृषगिरिर्वेंकटगिरिस्तस्येशः
१० सुशोभाः = पक्षे सुशोभना इतिच्छेदः नक्राः क्रमाश्चेति यथासंख्येन बोध्यम् ११ उदकंमाण धारणंच १२ ब्राह्मणः अग्निश्च १३ भोजनार्थं पलाशादिपत्रावली
करणे १४ पुष्पाणां शोभनमनसां सतांच १५ मधुरूपान्द्रव्यरूपांश्च १६ भ्रमरान्मद्यपांश्च १७॥ कौंतेयः धवलाच॥ ॥ ७ ॥ ॥ २१

जैनैर्गर्विर्हानिपरताकालांबुदैर्गर्जनंनीरंध्रंपुनरांध्रदेशनृपतिष्वास्तेसमंस्पर्शनम्॥५७॥ समंतादवलोक्य॥ अहोकृष्णागोदावरीमध्यमध्या
सीनानाममीषांवैदिकानामभिनंदनीयोयमनपायः संप्रदायः॥निगमपाठनिराकृतदुष्कृतानयविदोबहवोत्रधरासुराः॥प्रतिवसंतसुपात्रसुखाः
सुखंप्रतिवसंतिमुकुंदपरायणाः॥ ५८॥ अत्रत्यानामधिकारव्यापारनिरतानामप्ययंपरवल्लवकलंकोनियमः॥ आश्रयितव्योनरपतिराजेयितव्या
निभूरिवित्तानि॥आरब्धव्यंवितरणमानेतव्यंयशोदृशापिदिशः॥५९॥ कृ०॥समंतादवलोक्य॥ हंतसंततमत्यंतदुरितनिरतायवनाः प्राचुर्यतः
पर्यटंति॥पश्यसखे॥अवनावेतीनयवनाम्बुशोभिनोभवनानिशायिभवनावमर्दिनः॥सवनादिधर्मलवनायदीक्षितायवनाभ्रमंतिभुवनातिभी
षणाः॥६०॥वि०॥सत्यमेवमथाप्येतेषुतुरुष्कयवनेषुननन्यसाधारणविक्रमगुणमनुगृहाण॥युद्धायप्रमिलंतुहंतपटवोयोधाःसहस्राधि
कायद्येतेपिबलात्तुरुष्कयवनेष्वारूढघोटोभटः॥निःस्त्रिंशंपरिकंपयन्स्वकटकान्निष्क्रामतिक्रोधतःसर्वेतेकृपणास्तृणान्यशरणाःखादं
तिसीदंतिच॥ ॥ ॥६१॥ किंच॥पिबंतुमदिराममीपरितुदंतुदेशान्हठोहरंतुपरसुंदरीरपलपंतुवेदानपि॥तथापिचमृधांगणेतृणवदेवमु
क्त्वातनुंहठादहदधंतेमरुत्पुरकवाटिकोद्घाटनम्॥६२॥ इतिव्योमयानमन्यतः संचरयन्॥ अग्रतोदृष्ट्वासप्रत्यभिज्ञं॥ कर्णाटदेशोयः पूर्वकर्ण
देशमभूषयत्स एषसांप्रतंपरस्यचक्षुषोभूषणायते॥६३॥ लोचनासेचनकंकिलास्यदेशस्यरामणीयकम्॥ प्रतिनगरमिहग्रामाःप्रत्यारामपचे
लिमाःक्रमुकप्रसवाः॥प्रतिक्रमुकप्रतिप्रसवमप्युत्सर्पतिमधुततिः॥६४॥ प्रतिमधुबिंदुमिलिंदाःप्रेंखंतिप्रतिमिलिंदमाराचाः॥ प्रत्यारावंसु
दृशांमदाउदाराप्रतिमदंमदनः॥६५॥ कृ०॥ हंतकथमभिनंदयसिनिंदनीयममुंदेशम्॥ तथाहि॥वेदद्वैदिकविद्वेषदूषिताभस्मरूषिताः॥

टी०॥ १ गर्जितंवल्लानंच २ निर्दोषि ३ दानं ४ वसंतेवसंते ५ नाम्याधिकवेगा अम्बाः ६ शिवविष्णुदेवालयभंजकाः ७ ध्वंसः ८ कृतदीक्षाः ९ अन्यसाधारणोयोनभ
वतिसः तदेकनिष्ठइत्यर्थः १० अश्वः ११ खड्ग १२ युद्धांगणे १३ स्वर्गकपाटोद्घाटनं १४ अतिस्पृहणीयम् १५ परिपक्वाः १६ भ्रमंति १७ लिप्ताः॥

चंडुः[1] सत्यत्र पारदं डालिंगालिंगितवक्षसः ॥६६॥ आकर्णयतावदन्यदप्यमीषामपचरितम् ॥ शिरः पुरारेर्द्विजराजपाद[2]दिव्यौ मृतैः सिक्त मितीर्ष्यये
व ॥ भूद्राड्मेलिंगधराः स्वयंतत्व पादतोयैः स्नपयंति कष्टम् ॥६७॥ वि॰ ॥ सखेमे वं संगदिष्टाः ॥ यदस्मिंदेशे यदुशैल प्रभृतीनि दिव्यक्षेत्राणि दृश्यं
ते ॥ दुरितमवनतानां दुर्निरोधं निरुंधन्नसितमतिभिरतंद्रैः सेव्यमानो मुनीन्द्रैः ॥ यदुगिरिरयमिंधे यत्र नारायणाख्या निवसति किल हंसे नीलमेघः प्र
पूर्वम् ॥६८॥ सभक्त्युन्मेषम् ॥ यदुगिरितटागारा स्वाराजमौलिपरिस्फुरन्मणिगणमहो धारानीराजितांघ्रिसरोरुहा ॥ नवजलधराकारा नारायणा
ख्यभूषिता निरवधिदया सा रौसा राजते परदेवता ॥६९॥ पुनः सविस्मयम् ॥ यः प्रभुर्यादवक्ष्माभृत पुरस्कृत्या पुरा बभौ ॥ अधुना यादवक्ष्मा
भृद्धः कृत्यास्त्वयं न्यग्भवत्यहो ॥७०॥ सश्लाघम् ॥ भूभृत्यास्मिन्नस्मिराजेन पूर्वेश्वेतद्वीपादाहृतां श्वेतमृत्स्नाम् ॥ धन्यानित्यं धारयंतो ललाटे मालीं भ्र
मत्यमानं संसृतिं मृजंति ॥७१॥ किंच ॥ विष्णुपदाकुलनपा विश्रुतो विमलीशयः ॥ कासारोऽत्र हरल्पेनुः कृविः कंसारिभागिव ॥७२॥ इति विमानमितरस्त्र
मरिस्पन्दपनुसानंदम् ॥ रजतपीठपुरं ननु कांचनश्रियमिदं वहते महदद्भुतं ॥ इह वसन्नुभभरीतिवेहो बुधः परमयोगनए वैविराजते ॥७३॥ पुनः सश्ला
घम् ॥ अच्छैर्द्विजेंद्रैः स्मृतोभिलाषादासेवितो भव्याभिजातकीर्तिः ॥ आनंदतीर्थोऽह्ययमत्रकश्चिद्रन्वर्थयन्नाविरभून्मुनीन्द्रः ॥७४॥ कृ॰ ॥ अस्तु तावदेव
मथाप्यदसीयदर्शनानुवर्तिनामधुना तनानां द्विजानामपि वहद्व आकर्ण्यतामपचाराः ॥ सततमकृतसंध्योपास्तिरभ्यस्तशास्त्रः सविनरि गते
बाल्यकाल्ये संध्यामुपास्ते ॥ तदपि भुवि नमान्यं मन्यते धन्यमन्यत्यजति विहितहानात्साध्वसंमाध्वसंगः ॥७५॥ किंच ॥ गायत्रीसहस्राजहद्भव
तीं यज्ञोपवीतं त्यजन् मुंचन् किंच शिखां विरक्त इव यः संप्राप्ततुर्याश्रमः ॥ आरूढश्च तुरंगयानमभयो हादं तदेशांतरे स्वर्णानामुपसंग्रहाय विचरत्ये

टीका ॥ १ अत्यंतकोपनाः २ चंद्रकिरणब्राह्मणचरणाः ३ सुधाउदकं च ४ शूद्रबुद्धिभिः ५ प्रकाशते ६ नारायणस्वरूपः ७ यदुराजपुरस्करणेन ८ एतन्नामकपर्वतः ९ क्षा
लयति १० जान्हवीपक्षे विष्णोः पदानि ११ मानसं अंतरं च १२ कांचनद्युतिशब्दश्लेषः १३ पित्तलं वर्तमानं च १४ सोऽहंयोगसहत्वं च १५ मध्वाचार्यः १६ प्रातःसंध्या ॥ ॥

को प्यमी षां गुरुः ॥७६॥ अहो महानेषव्यामोहो विदुषामपि कलिमाहात्म्यात् ॥ पश्य ॥ यस्य क्वापि विलोकने सवसनं स्नानं बुधैः स्मर्यते यस्यान्न
ग्रहणे च निष्कृतितया चांद्रायणं चोदितम् ॥ तस्य प्रस्फुतवाहनस्थितयते र्हृष्टिर्विमुक्तिप्रदा तस्यान्नं च समस्तपाप हृदिति प्रस्येति विद्वानपि ॥
॥७७॥ पश्य तावत्कलिकाल नरपालस्य गृहस्थेषु प्रद्वेषं भिक्षुषु पक्षपातं च ॥ भिक्षां कष्टमटंति कुक्षिभृतये पादौ गलैः क्लेशयंत्याश्छिन्नाः शिथि
लैः पटैश्च गृहिणो जीर्णे गृहे शेरते ॥ राजत्सूक्ष्मपटाः प्रशस्त शिविकारूढा गृहिभ्यो न्नदा ग्रावव्यूहदृढे मठे स्थितिजुषो धन्या हि संन्यासिनः ॥७८
अन्यच्च ॥ अनभ्यस्य वेदान होशास्त्रवादान् पठंतः स्फुटं तेव तैतन्मतस्थाः ॥ अधीशाननादृत्य तद्भृत्यपूजापराणां नराणां पदं ते भजंते ॥ ७९ ॥
किंच ॥ एकादश्याकालयो हौंमहोना देषामग्निर्लौकिकत्वं प्रयागात् ॥ तस्मादेषां व्यर्थहिंसानिवृत्त्यै स्यादुत्कृष्टः पिष्टपश्वादरोपि ॥ ८० ॥ किं० कि
मरे कष्ट वा भक्तिप्रकर्षदीप्रो नु पिविप्रान् दूषयसि ॥ शकृद्वा हि किल मध्वसि ध्वांत निष्ठा नामियं हृदयंजरी हरीतिरीतिः ॥ आबालस्थविरस्थिरं
[illegible] निश्शं हे [illegible] व्रतनिष्ठ सूद महर्निशं विजयते नारायणाराधनम् ॥ श्लाघ्या भागवतेषु भक्तिरमिता श्रद्धान्वयेषां दृढा शास्त्रेष्वीयगुरुर्दितेन
[illegible] साध्वेषमाध्वेषु किम् ॥ ८१ ॥ एतद्गुरूणां यतीनां पुनः येषामाकलितदोषवै धूर्याशुभ चर्या ॥ दनुजभिद् भिषेकैः सत्पुराणावलोकैः पुनरप्यह
[illegible] रैः पुण्यतीर्थावगाहैः ॥ भवकदनविदग्धैर्ह्यविद्याविचारैः स्वपणमिव यतिवर्याः कालमेतेनयंति ॥ ८२ ॥ यदपि त्वयातदुपरि दूषणमुपन्यस्तं तदपि
मदापहितहृदयैः भवादृशैर्भ्य एवेरो च तेन न तु गुणग्राहिभ्यः ॥ तत्तद्देशनिवासिशिष्यनिवहत्राणाय गुर्वाज्ञया संचाराः समएष विंदति यति श्वे
[illegible] हनकासति । दत्तं वित्तमशेषमास्तिकजनैर्देवारिनित्यार्चना साकल्यस्व पमस्य शन्व सतिचेन्निंदास्ति किं तावता ॥ ८३ ॥ किंच ॥ स्वामिनि विनि
मुक्तानां मतेनानध्यवस्यता पतिना ॥ कृत्यं पत्यनत्त्वे प्रत्यव यं त्यत्र तद्भुजस्तु कुतः ॥ ८४ ॥ एतेन मतांतरस्था अपि मठाधिपतयो यतयो व्याख्याताः ॥
टी० ॥ १ निष्ठिवनोति २ गमनैः ३ विष्णवादीन् ४ सायंप्रातः संबंधिः ५ होमाभावात् ६ दीप्तान् ७ पुनः पुनर्देरति ८ आबालवृद्धं ९ निर्विभ्रमम् ॥ [illegible] [illegible] [illegible]

वि· [illegible]द्वचा वधेयम्॥ यदि कतिपये जाताल्लस्याद्यथास मर्यहि जावतनन तनुषुः संध्योपास्तिं भविष्यति किं ततः॥ निगमचरितानंगीकारो हि दूषणमेभिना

११ मशकनवशद्दोषाय्येषानजात्वनत्वनुष्ठितिः॥८५॥ किंच॥ पथ्यानमनुरुधानः पित्रा दैन्यैवद्रक्ष्यति॥ इति स्मृतिमधीयानैरेषां दोषो हि दुर्वचः॥८६॥ इ

तिर्विमानद्दूरतः समानयन् सुरतोद्दृष्ट्वा॥ भाषावेषाचारैर्भूषाभिः पुरुषाश्चयोषाश्च॥ वीक्ष्यस्व प्रति देशं विलक्षणा एव हेतलक्ष्यन्ते॥८७॥ कृ०॥

गुरवेवीसर्वतिमार्गोचः किंतु सत्वरमतिक्रम॥ कीशकल्पजनानिमान् जनपदान्॥ चेद्रालोकचपांधकारभरयोश्चापेयकिंपीकपोराजत्कुं

ति[illegible]मा॥ [illegible]लिकपोराजी वभत्तूरपोः॥ खेलत्कोकिललोककाककुलयोः क्षीरार्णवाब्धोरिवव्यक्तं पंडितमूर्खयोः समदृशो ब्रात्याद्दहृत्याद्वि॥८८

[illegible]मिसयेक्षि[illegible]नमुपानपन् सानंदं सांजलिबद्धं च॥ स्फुरभितमतमालस्तोमपुण्यद्रुसालप्रकरतिलकसालप्रेषुस्कंधद्रुजालः॥ श्रितसमवनश्री

लः श्रीश्री[illegible]नुकूलः शिथिलितभवमूलः सेव्यतांशेषशैलः॥८९॥ पुनः सहर्षम्॥ पन्नगेषु च नगेषु खगेषु हीपिराजसे पृषत्कहशत्क[illegible]॥ बहु

[illegible]नदृशो षुषुरीषु प्रार्थयंति जैनिमत्र मुनीन्द्राः॥९०॥ विविधनिगमसारे विश्वरक्षैकधीरे वृषशिखरिविहारे वक्षसाश्लिष्टदारे॥ भगवति यदु

वीरे भक्तबुद्धेरदूरेभवतु चिरमुदारे भावनानिर्विकारे॥९१॥ अहो महोन्नतारवल्वस्य शैलस्य धन्यता॥ वैकुंठेपि निरुत्कंठमकुंठविभवंमहः

॥ तदत्रचित्रचारित्र्यंरमतेरमयासमम्॥९२॥ इति सानंदं ध्यायति॥ कृ०॥ हेतन्व्य पूतविषयांतरव्यासंगं त्वदंतरंगं देवएवास्मिन्ननुभवति

दृढसंगम्॥ वि०॥ सखे सत्यमेवोदितं भवता॥ दधती चिराय सदती सुरस्थले तदती तसीमदद्दवीस्फुरखं सताम्॥ रसिकस्य चित्तमिह कस्य देवता

प्रतिपन्नपन्नगनगानगाहते॥९३॥ कृ०॥ किमरे केवलमर्थपरममुं देवमनुसंधत्से॥ इष्टप्राप्तिमनिष्टभंगमपिवासंप्रार्थ्य भुक्त्याजनैर्यहातव्य

मिति प्रतिश्रुतम भूद्व्यंतदास्तेफले॥ तेदास्यातिनचेत्स्वयभयमसावुत्पाद्यते षापुनः हृत्नसौर्यंहिहिरण्पहस्तदहृदंशृण्हातिहृद्योसमम्॥९४॥ टि०१वान

र·२ चंपकः ३ पांगाराइतिप्रसिद्धः ४ शेषः ५ डुंडुभाख्यः सुद्रसर्पः ६ कूपः ७ उत्तनिं ८ अंतःकरणं ९ मानसं १० अतिशायितं ११ प्रतिज्ञातं १२ सुवर्णं हिरण्यास्यश्च १३ आजइतिलोके प्रसिद्धम्॥

॥किंच॥ नातेत्यामंत्र्य क्वचिद्दून भुवि तृषितस्तोयबिंदून्ययाचे कस्याप्युच्चैस्तटाकं खनत इह गिरौ हंत मृद्भारमूहे॥ दत्तां केनापि सूनावलिमधि मुकु
टं मूर्न्यमीभिर्वदध्रे सोपभूपः श्रुतिज्ञैर्भुवनपतिरितिस्तूयते ध्यायते च॥९५॥ वि॰ किमरे करुणानिधये व्यंकटाचलपतये प्यसूयसि॥ शृणु तावत्॥
॥नियंता जंतूनां निखिलजगदुत्पादविभवप्रतिक्षेपैः क्रीडन् परमपुरुषः पन्नगनगे॥ परत्वे सौलभ्यप्रकटनकृते वेंकटपतिः कृपासिंधुः कां कामनु
मनुजलीलां न तनुते॥९६॥ किंच॥ किमप्युत्पादाय दिशन्नभीष्टं कृत्स्नं जनेभ्यः पतिरंजनाद्रेः॥ कृष्णावतारी यदुकुंचैलसंपत्प्रदानशीतिं विवरीवरीति॥
॥९७॥ प्रियसहचरी लक्ष्मीः स्थानं सहस्रवक्त्रः स्वयं कुवेलपपतिः शालोरत्नाकरः श्वशुरो हरेः॥ तदपि हरति द्रव्यं पूर्णो जगत्पतिरेष यत्तदिह भज
नां कर्तुं नृणामुदग्रमनुग्रहम्॥९८॥ अखिलहेयप्रत्यनीकानंतकल्याणगुणैकतानस्य विश्वनाथस्य श्रीनिवासाभिधानस्य परस्य ब्रह्मणो
गुणार्णवामृतकणानां गणनायामनिपुणधिषणाधिषणादयोपि॥ गांभीर्यैकावलंबे गिरिमनिवसनौ कांतिकुल्यातटाके कल्याणांभोजकल्पनि
रवभि[illegible]णासारकल्लोलराशौ॥ चानुर्यौदार्यलक्ष्मीविहरणशरणे सद्गुणौघान् दधाने देवे श्रीवेंकटेशे नजिगणयिषतां केन वाग्मीन वाचां॥९९॥
किंच॥ सिमयाहिहर्विदेः समग्राहिगुणावलिः॥ प्रत्येकं सेपि परत्वेस्य प्रत्युसेपिष्टु संशयः॥२००॥ अहो महोनस्वाम्यस्य सौलभ्यं कनककुसुमस्य
सौरभ्यमिव [illegible] एव स्वदते॥ पश्य॥ प्रचंडविश्वकंटकप्रखंडनैकपंडितः पतंगमंडलेवसन् य एष पांडवप्रियः॥ अकुंठरीतिकः प्रसन्नपुंडरी
कलोचनः सकुंडलीद्रभूधरप्रकांडमंडनायते॥१॥ अवलोकयनावद्वरगवरधरणीधरशिरोमणेश्चक्रपाणेरतितरसकरवरवितरणकौशल
मतिपेशलम्॥ मूकारब्धं कमपि बधिराः श्लोकमाकर्णयंति अंधा तुष्टं विलिखति कुणिः श्लाघया वीक्षितेंऽधः॥ अभ्यारोहत्यहह सहसा पंगु

१ तोयबिंदुयाचकः मृद्भारवाहकः मृन्मयपुष्पावलिधारकश्च स एव लीलया भवति २ सृष्टिस्थितिसंहारैः ३ परलोकविषये ४ कदाम ५ प्रकटयति अंगीकरोति वा ६
किरणाः मणयश्च ७ पृथ्वीकमलं च ८ बृहस्पतिः ९ उषःकालः १० क्रीडागृहे ११ मौनभाजा १२ सम्यग्गृहीता १३ त्याजितः १४ क्रियापदं १५ सूर्यः १६ कुब्जः ॥ ॥

वि॰ द॰
१२

रम्यद्रिशृंगसांद्रालस्याः शिशिरभरणतोमेदंमेदंतुबंध्या।।२।। सर्वतःपर्वतमालोक्य सश्लाघम्।। सर्वोत्तुंगश्रितशृंगभगुहः साध्वभिरख्यातशीलोभास्व
हृष्टोपचयजनकः सानुकूलः स्फूर्निकोयम्।। एवंनूनंक्षितिभृतममुंजानतीजानकी शंकाशश्रेणीकलपशरणीकुर्वतीवर्वर्तीति।।३।। पुनःसानंदम्।।
प्रकाशबहुपादैर्वृत्यविफणिक्षमाभृत्पदः प्रकाममवलोक्यतेपरमम्नन्यदत्यद्भुतम्।। निर्जोरसिपयोधरंचिरमचंचलोविद्युतंपयोधरमुरस्यस्याव
विदधतिक्रीडाकुमाराइहस्वैरंतांत्रिककारिकाःपरिपठंत्येतामुहुःसारिकाः॥९४॥ किंच॥ प्रातःप्रातःपयसिविमलेपावनेसह्यपुत्र्याः
स्नात्वापस्त्वायंसकलविषयत्यागिनोयोगिनोमी॥ वारंवारंभुजगशयनेलोचनाभ्यांपिबंतोक्षामक्षेमाःक्षणवदखिलंकालमत्रक्षिपंति॥९५॥ कृ०

टी० १ कवेरात्मजाकन्येतिश्लेषेण २ शोभनंतमर्णवंसुवर्णयुक्तंच ३ आम्रतामृइतिपदे ४ त्रपु ५ रूप्यंपक्षेतसिमत्स्यपोतम् ६ बहुलकल्याणाः ॥ ॥ ॥

वयस्यविस्रब्धमेवाभिभाषसे॥ सारंगदृष्टीः कथमुत्सृजंत्यः सारंगदृष्टीः स्वदते मुनिभ्यः॥ कवेरजासंगतिमुच्छ्रिसृप्तोः कवेरजासंगरुचिः क
थंस्यात्॥९६॥ वि०॥ सरवैभवता भणितानापदानाभ्यासेनैव विरोधः समधिपद्ध्यत्यग्रतः पश्यन्नंजलिं बध्वा॥ श्रीरंगेशोभते यस्य श्रीरंगेशोभ
ते च यः॥ नमोहं कलयेतस्मै नमोहं कलये तततः॥९७॥ किंच॥ प्रणिपति कर्मीकुर्मः फणिपतिभोगे शयं रथांगशयम्॥ कारणमेकंजगतां वारण
पतिभीतिवारणं ज्योतिः॥९८॥ कु०॥ किमस्मिन्महाभुजंगे क्रिमपंते त्वया प्रणामाः॥ तथा हि॥ भूपामोत्तुंगपयोधरोज्ज्वलरुचिस्तन्वन्भुजंगा
न्वयं श्रीरंगस्थलनित्यवासिरसिकः शृंगारिणामग्रणीः॥ प्राकारप्रकरांतरस्थितिमतीं याराजपद्धिन्यहो निःशंकं परपूरुषश्च्चिर मसौ निद्रा
तितत्संनिधौ॥९९॥ वि०॥ श्लेषावलंबनादोषानमेरोषावहाः॥ प्रस्तुतदोषावहाइतिनाहमत्रोत्तरयामि पुनर्निरूप्य॥ क्षितिभृद्धिर्निजमौलिर
षु धृतपादोविहितापकारी च॥ इंदुरिवरंगबंधुर्दोषाभावेविलोक्यतेकिंतु॥४००॥ यद्वा॥ नविधोशृभरंगलसित्तांगेसकुमुदाप्यायनकारिणी हृ
दृष्टे॥ कुलयामि कुरंगलसितांगंकुमुदाप्यायनकारिणं विधुंतमम्॥१॥ पुनः संचिंत्य सविस्मयम्॥ रंगेशसेवकोयुक्तेनोच्चैरीतिंभजेदिति॥ चित्रमेतद
संगीतिव्यपदेशं यदश्नुते॥२॥ अन्यदद्भुतमद्भुतमत्र श्रीरंगधामनि॥ यच्चेद्याभिरव्ययाप्येषाशोभतेपुष्करिण्यहो॥३॥ समंतादवलोक्य सश्लाघम्
॥ रंगास्येत्रमिदं रमेशितुरभिव्यक्तिस्थलं प्राहुर्भवीर्थसेवमरुहूधाभगवतीयांतां स्तुवीनिश्रुतिः॥ सर्वात्मानगरस्य चास्य जगतां निर्वाहको नायको
वासश्चेदिह लभ्यते जगति को वैकुंठमुत्कंठते॥४॥ कु०॥ सार्धांगीकारम्॥ सोयंयद्यपि हृद्य एव विषयः सायंतनेंदीवरश्यामांगेन सनायकः कृत
नमोभंगेनरंगेंदुना॥ भ्रांताः किंतु चरंति हूतपिशुनाः शांतात्मनां नापदाः श्रीमंतो यदुदंचनाहूतनरवल्वत्रा समत्रासते॥५॥ किंबहुना॥ नित्यं कांच
नसिंधुमध्यरुचिरो निष्कंपसंपन्निधिर्निस्तल्यामपि कांचनश्रियमुरो मध्येदधानः स्वयम्॥ विभ्यत्किं पिशुनेभ्य एव बहुलप्राकारसंवेष्टितेशो ते

१ वितसर्पा २ रंगस्थलं क्षेत्रं च ३ चंद्रनृपौ ४ रानापर्वतश्च ५ किरणाश्चरणाश्च ६ रंगसंतके विष्णौ ७ सुरंगमित्यर्थः ८ प्रसिद्धचंद्रम् ९ नृत्तरीतिं आर्तरीतिं च १० संगीत्यभावः संगरहितत्व

धामनिरंगनायकइतिस्वाख्यामिहस्थापयन्॥६॥वि०॥सखेनजातुश्रीमतांहानिः॥प्रत्युतत्तद्दूषणांपिशुनानामेवभवंत्यनर्थाः॥परवित्तजिही
र्षयामहत्तः पिशुनस्तत्स्वयमेवनाशमेति॥कलभःशलभस्यकिंनदाहः पृथुदीपग्रसनायजृंभितस्य॥७॥ अलमन्यप्रसंगेनतमेववरंगेशं श्रीरं
गधामानमनुसंदधामि॥सविस्मयं॥सपर्याविरूढादपिमाद्युमीष्टेसमर्थोजगत्यांयतोराममचंद्रान्॥ अरंगाधिराजोदितप्रौढभक्तेरपिप्रापपूजां
स्वरंगाधिराजः॥८॥ अथवानात्रविरोधइतिसमर्थयते॥कुम्भस्तुहानात्महस्तसंग्रहीराघवःस्मम्॥ हंताकुरंगराजस्यरंगराजमपूजयत्॥९॥
पुनःसभक्तिप्रकर्षंभगवंतमुद्दिश्य॥कृतस्तवस्तुतिघोषेशत्रुस्फीतरोषेनिहतविनतदोषेनित्यदास्याभिलाषे॥ललितवपुषिशेषेलब्धसंपू
र्णतोषेपरमपुरुषशेषेपर्वचंद्राविशेषे॥१०॥भगवन्रंगनायकभवदीयसदसिभाषितुमपिवयंबिभीमः॥ तथाहि॥ कर्तृव्याकरणस्यवामभिते
रथस्यप्रवक्तासनंभाष्यंव्याकरणस्यसाधुविदधेशाप्यापदीयापुनः॥ यह्नाहोद्विजशेखरः कृतिमयोयस्यभूषाभारतीगोष्ठ्यांत्रस्यतितस्यते
कविजनोरंगेशकर्तुंस्तुतिम्॥११॥ पुनरंजलिंबध्वासप्रार्थनम्॥वरगुणगणसीमावारिदश्यामधामासततममरामासंघसंगीतनामा॥परि
हृतभवदामाभासिताकल्पहेमाममकलयतुभूमामंगलंरंगधामा॥१२॥ अन्यतोपीस्यसश्लाघम्॥स्वामिनीसौमिनीलाङ्कमदमोचनलो
चनाम्॥ अंगनांरंगनाथस्यदीप्तिंमूर्तिमतीमिव॥१३॥ देवीमुद्दिश्य॥मोहोन्मूलनमूलिकाभवजुषांमोक्षाध्वनिःश्रेणिकाचेतःशुद्धिविधान
सिद्धगुलिकाचिंतामणिश्चंद्रिका॥विद्याविभ्रमसारिकाःस्मितकमलेविष्णोरुरोमालिकामातस्त्वंममपारिजातलतिकामोदांबुधेर्वीचिका॥
॥१४॥ वि०॥ कांत्येवहंतरत्यापिकमलामपिचंचलां॥अशिष्टेष्वेवरज्जंतीमभिष्टौतिकथंबुधः॥१५॥ तथाहि॥ प्राकृपर्यंकमधिष्ठितोपिमृ
दुसंप्रपल्लवाग्रशय्यामपिप्रायःप्रार्थयतेकदन्नमिवयःक्षीरोदनंभुक्तवान्॥ प्राश्नात्येषकेदुष्णिकाममृतवत् प्रागात्तपीतांबरःकंथांयाचति॥

टी० १ सभा २ स्थित्यास्वभावेनच ३ विद्युतंचपलांच ४ दुर्यवागूः॥

भृत्यति क्षितिपतिर्लक्ष्मीकटाक्षाश्रये ॥१६॥ अन्यच्चावधेयम् ॥ दातुर्ह्यर्थिय एष वारणमगात्तद्धार्यहो वारणं पश्याम्यद्य विराद्दशो तभुवि यो भूत्तत्स्व
शेते भुजे ॥ नाहारान पिलेभिरेयद्वल्लाहारान भूस्त्वत्त्रियाविंद तेकमलादृगूर्मिभिर्ह्यो निम्नेभवत्युन्नतिः ॥१७॥ इदं च बोध्यमित्रियमुद्दिश्य ॥ हन्तु
वैधुजनान् धनार्थमनघान्गंतुः परस्त्रीशतं रन्तुं जंतुविहिंसकैः सहजनैः संतुष्यतो वंचनैः ॥ वक्तुं तीक्ष्णमयुक्तमेव वचनं पंकुमितं चौदनं नि
त्यं नृत्यसि मंदरेषु कमले कत्यं तवैतन्मतम् ॥१८॥ अन्यच्च ॥ एषामन्यकलत्रदर्शनकलान्युत्पत्तिशून्येदृशो मूढं हृच्च परार्थचिंतनविधौ मिथ्या
न भित्त्वं मुखं ॥ अप्रज्ञातपशून्बुभुक्षितशिशून्नभ्योदकैस्ताम्यतस्तेषां लक्ष्मि गृहान्दृशाच भयभीते वेहनावीक्ष्यसे ॥१९॥ वि० ॥ सर्वेमनसः ९
स्वैक्षजननी तवेयं वाणी ॥ यतो दुःशीलेषु दृश्यमानाः साधुजनानुपयुक्ताः संपदाभासाः प्रस्तुतमृत्फतरणकारणभुवनजननीकृपाकटाक्षवै
भुर्येनिबंधना एव ॥ उक्तं हि ॥ गुणहानेरुदधिदुहितृवैमुख्यनिबंधनत्वमुचितं तेन केनचिद्धि दुषा ॥ सद्योवैगुण्यमायांति श्रीलाब्धाः सक
लागुणाः ॥ पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे ॥२०॥ ततश्च ॥ संपत्तिः किंपचैर्नानां संप्राप्ता कापथेनया ॥ नरकानुभवोदर्कीनसालक्ष्मीः
कृपाफलम् ॥२१॥ तथाहि ॥ धन्यंमन्यतपातृणीकृतबुधाधर्मद्रुमेधमः सेर्ष्याः स्तामसपुण्यलेशविलसत्संपल्लवाः पल्लवाः ॥ पश्यास्तूनपहाय
पंचषदिनैरांकल्पमल्पादमे भोक्ष्यंते बत यातनाबहुविधाः कान्तौ नगर्वान्तरे ॥२२॥ यच्च भणितं भवतात्र भवतः शिष्टान्लक्ष्मीनवीक्षतइतितद
ज्ञानोपहृतहितमेव ॥ यतः साधुजनेभ्यो मुक्तैश्वर्यपर्यंतनिरंतरभगवद्भक्तिसंपदं प्रदत्ते दूरापास्तमारामयविकारावाराशिदुहितुरुदारकटाक्ष
सुधाधारा ॥ संभोगारंभजृंभन्मदकितवपरीरंभसंपीड्यमानाप्रौढस्त्रीरत्नहारप्रशिथिलगुणवन्भंगुराः संपदोघाः ॥ साधूनामाश्रमभूवनस्कर
पुरनिरयीकारदक्षा हि लोके भोक्ष्यंते मोक्षमंते स्थिरनिरवधिकानंदधारात्मकं ते ॥२३॥ किंच ॥ लक्ष्मीकटाक्षपूरः सजयति यदुपच्चयतारतम्ये
न ॥ नरस्करपशुप्रजानापतयः स्युर्हैतजंतवः केपि ॥२४॥ टि० १ भृत्यवदाचरति २ कृपणाः ३ अन्यायेन ४ औकल्मिकम् ५ पंचषड्वापानि ६ कृतां तोपमस्त
स्यपि

वे॰ द
२५

कृ०॥कमलाकटाक्षाविशयोविभवोपचयहेतुरितिनोपपद्यते॥यतस्तदल्पीयस्त्वमेवसंपदुत्कर्षसंपादकम्॥तथाहि॥गजशिबिकातु
रगाःस्फुरन्नरस्यतन्व्याहृशाहरेस्तन्व्याः॥तद्भ्रूमिभवतिवाह्योनीरदवक्षाच्चहृतपक्ष्मीच॥२५॥वि०॥विहस्य॥ईदृशीमुत्कर्षपिशुनामरविं
दालयामभिनंदामि॥किंदर्पदायकधनोपचयेप्रमत्तैःकंदर्पसायकहतेःक्षितिपैरिहेति॥संततपुरंदरनुतत्वरविंदनाभेरतःपुरतदवनाव
नुचिंतयंति॥२६॥पुनरनुध्यायसांजलिबंधम्॥मातस्तेमधुसूदनप्रणयिनिप्रातःसरोजच्छटामुष्टीमुष्टिविचक्षणेशुभगुणेदृष्टीनमस्कुर्महे
॥अष्टाभिःकिलदृष्टिभिश्चतिसृभिर्जुष्टाःसहस्रेणवादेवाद्वादशभिश्चयद्द्विषयतामेवार्थ्यतेक्षणम्॥२७॥इत्यन्यतोवीक्ष्यसानंदम्॥
उग्रारिपुनिग्रहपविग्रहदिवौकश्चक्रवृतशाक्रमदविक्रमनिहंता॥मोदरसमादरसमेतइहपूर्णःप्रक्षिपतुपक्षिपतिरक्षिपुगुलेमे॥२८॥कृ०॥किं
वर्णयसिसुपर्णमसुमतिक्रांतमयोदम्॥तथाहि॥अधिगतनिगमागोपिद्विजराजोप्यच्युतंदधानोपि॥निजगारकथंकारंनिःशंकंभिल्लपल्लि
कांगरुडः॥२९॥वि०॥पक्षिराजस्यभिल्लपल्लिकानिगरणेनसाधुजनानुग्रहासाधुजननिग्रहसामर्थ्यसदसद्विवेचनचातुर्यंचव्यंजितमेतत्कथ
भूषणमेवदूषयसि॥शृणु॥गरुडोगिलन्किमपिकिल्बिषाविलंखलुभिल्लजालमुषितंतदंतरे॥निरजीगलन्निजगलाद्विलासरभवतःप्रप
न्नमिवपन्नगेशयः॥३०॥हंतशकुंतपुरंदरस्यास्यस्वच्छंदविहारावसरेष्वप्यभंगुरमेवस्वामिकैंकर्यम्॥यतः॥स्वज्येष्ठप्रेयहयोश्रितरथधुनि
मन्मंडलस्याच्युतोप्यसन्मार्गपक्षवातोद्धतधरणिरजच्छन्नमेतज्जवेन॥कल्लोलैरुल्लसद्भिःप्रचलजलनिधेःक्षालयन्घूर्णदर्णःश्रेखड्डिंडी
रखंडच्छलकुसुमकुलैर्मंडयत्पंडजेन्द्रः॥३१॥पुनरभिध्यायन्॥यद्गीक्षाधैर्यरक्षाकिलपुलकभृतापाचतादेवतानामासेवासमर्दकाले
गिरिशफणिगणाद्विभ्यतामभ्यतानीत्॥सोयंगंभेयपृथ्वीधरवरशिखरच्छायदायादकायश्छिंदन्वृंदंरिपूणांकलयतुकुशलच्छादसो
नःशकुंतः॥३२॥पुनःसविस्मयम्॥नगरूपमुपैतिमुक्तमंगीकृतशास्त्रोपिसुपर्णउन्नतोपि॥टि०१ दृक्सरूपत्वं २वेदशाखाःशिखाश्च ३ दलानिपक्षाश्च॥

२५

विंनतेक विधेयएषचित्रं स्थिरमामोदमगान्मधौर्विपक्षात् ॥३३॥ अथसर्वतःपुरींनिरीक्ष्यसांजलिबंधम् ॥ श्रीवल्लभदासेभ्यः श्रीरंगक्षेत्रनिलयवा
सेभ्यः ॥ त्रुटितभवपाशेभ्यः नमोस्तुकृत शिष्यधीविकासेभ्यः ॥३४॥ कृ० ॥ सखेवसर्वानितस्तुरवास्तव्यान्नमास्मभवान्नमस्कार्षीत् ॥ निबिडीस
गुणस्तोमैर्हरिदासैरलंकृते ॥ अदृष्टशूलाःकतिपयेपट्टनेस्मिन्प्रतिष्ठिताः ॥३५॥ निरूप्यसविस्मयं ॥ शाक्ताद्यर्थंहविरघहरंशौरिणास्वादितंयत्
दत्तंवित्तग्रहणचपलाःकेपिविक्रीणतेतत् ॥ धामश्रीमद्यदिमधुजिताधीयतेस्वीयमेतेनत्रस्यंतेधनकणतृषास्तत्त्वत्रिकेतुमज्ञाः ॥३६॥ वि० ॥ मे
दमतेमैवं ॥ किंकिंनजीर्यतिमुकुंदपदारविंदद्वंद्वाभिवंदनकृतामिहदेहभाजाम् ॥ अत्यद्भुतौषधविशेषनिषेवकाणामापाद्यतेकिमनर्थमप
थ्यसेवाम् ॥३७॥ समंतात्पुरीनिरीक्ष्यसश्लाघम् ॥ रंगादन्यदनंगारेःकैसारेर्वास्थलेम्ब हो ॥ किंदृष्टंकिमपिक्षेत्रंसप्तप्राकारवेष्टितम् ॥३८॥ कृ०
वयस्यमेवंवोचः ॥ अभ्यर्णस्यपुरस्यैतदुधिसद्मात्मजातटम् ॥ शैवक्षेत्रमवेक्षेथाःसप्तप्राकारसंवृतम् ॥३९॥ विस्मयं० ॥ विहस्यसत्यम् ॥ ज
टाधरप्राकारसंवृतस्यास्यश्लेषनैपुण्येनैवरंगसाधर्म्यंसमर्थनीयंनिपुणंनिरूप्य ॥ नंदत्कंदर्पदर्पक्षपणनिपुणदृग्वह्निसंपर्कलाभारुणफः
फण्याग्रगण्यप्रकरमयतयाभीषणैर्भूषणैर्यः ॥ कांतःसांतःपुरःसन्कवलितगरलोराजतेराजतेद्रौमत्यांसत्यात्मजायांविहरतिसुचिरंशंकरः
शंखरोचिः ॥४०॥ कृ० ॥ सखेनात्रस्यातन्यम् ॥ यदिहकिंचविलक्षणारीतिरालक्ष्यते ॥ पश्य ॥ येतोयैर्नदीयैरभिषिक्तास्तेहिनापमुञ्जंति ॥ प्रत्युतज
हातितापंकावेरीशंकराभिषेकेण ॥४१॥ वि० ॥ कुतएवं ॥ कृ० ॥ शृणुतावत् ॥ गंगानुषंगाद्यमुनासदर्थ्येत्यसत्यतापाबतसह्यकन्या ॥ गंगाधरेस्वैरभिषि
च्यमानेतोयैःस्वयंतापमिपंजहाति ॥४२॥ वि० ॥ ईदृशंदूषणंगुणग्राहिणामभिमतमेवेति अन्यतोविमानंप्रस्थाप्यसानंदम् ॥ अमीखलु ॥ व्याला
धिपशाय्यशुभस्थलभूषतैलाःस्वैलाशनापतनसांद्रतरांतरालाः ॥ चोलावि भांतिपवमानवि हारवेल्लद्दोलायमानसहकारनवप्रवालाः ॥४३॥
निपुणैर्विभाव्यसोत्कंठं ॥ नागवल्लीमतल्लीभिःसमुखीभिरिवादरात् ॥

॥टि०॥ १ नम्राः २ वसंतदैत्यौ ३ पकान्नकयस्थानानि ४ अभिर्जटाभिसहितःशंकरस्त सप्तप्राकारः ॥

परिरब्धाः प्रमोदं ते क्रमुकाः कामुका इव ॥४४॥ इतश्च भवानवेक्ष्यताम् ॥ अभ्रंलिहानहह पश्य मरुद्बुधा यारोधोरुहः पृथुफलानिह नारिकेलान् ॥
आगच्छते सवितृमंडलमाश्रिताय देवाय भक्तितद्ववात्तनवोपहारान् ॥४५॥ कृ० ममत्वेवं मतिः ॥ लोलद्दीर्घदलावृहन्नरफलावातोल्ललत्धूलिभि
श्छन्नाः प्राकृतमाः स्फुरंति पुरतो ये नारिकेलद्रुमाः ॥ धूमास्वादनपात्रधारिणइमे द्राघिष्ठचंचज्जटाभस्मोद्धूलितमूर्तयो विवसनाः पाखंडिभेदा
इव ॥४६॥ वि० ॥ सहासमन्यतो निर्दिश्य ॥ पद्मिन्याकर्षोचितगंधप्रसवान् प्रपश्य पुन्नागान् ॥ अतनूग्राशुगकेलनात्संप्रासानधिकरेणुसंपर्कम् ॥
॥४७॥ पार्श्वतो वीक्ष्य ॥ अहो महोन्नता जनपदानाममीषामभिजा ता ॥ पश्य ॥ ज्योतिष्टोमस्तोमउक्थ्यातिरात्राप्तोर्यामः षोडशीवाजपेयः ॥ सौ
ढायज्ञाः पौंडरीकाद्या ये चोलेष्वेते चित्रमोपासनंति ॥४८॥ पश्य ॥ गृहे गृहे पश्य कृताग्निहोत्राः शास्त्रौघधौतान्त्यदोषाः ॥ पुण्योत्तराः पंडित
पुंडरीकाः पुनंति वैदैकधना जगंति ॥४९॥ कृ० ॥ एतद्विषयविषयाश्लाघा शास्त्रानुशारेण न कर्तव्या ॥ यत एतद्देशवसतां सतामप्यनेकप्रकारा दुरा
चारा उपलभ्यंते ॥ स्नाति प्रातरधिस्रवंति विधिवत्संध्यादिकर्माचरंत्यग्नीनादधते मखान्विदधते शास्त्राणि चाधीयते ॥ अभ्यर्चंति सुरान्परा
र्घ्यकुसुमैरर्चंति किंचातिथीनन्यैः किंतु पुरातनैस्तनुममी पुष्यंति दृष्यंत्यतः ॥५०॥ पुनर्निरूप्य सविस्मयम् ॥ कष्टमेतद्देशवासिनीनां विलासिनी
नां लज्जाव्युत्पत्तिराहित्यम् ॥ तथाहि ॥ अपिहितचोलवासे स्थैर्यवतीनां विराययुवतीनां ॥ अपकंचुलिकाबंधो कुचकुंभावितिविरुद्धमुपलब्धम्
॥५१॥ किंच ॥ अगूढगाढस्तनकुंभिकुंभमंभोजदंभोद्यजैत्रनेत्रं ॥ चित्तेनिधत्ते बत चोलदेशस्त्रैणं प्रवीणं रतिकांतबाणं ॥५२॥ अपिच ॥ नवा
र्तवमहोत्सवेन तु सहस्रशः संगता गृहाद्वहिरशंकितं गदितकामगाथा शताः ॥ अहार्यकठिणस्तनप्रकटनादनागस्विनो मुनेरपि घनां धृ
तिं चुलकयंति चोलांगनाः ॥५३॥ वि० ॥ वयस्य मास्म निंद चोलमंडलवासिनो जनान् ॥ याभिः सर्वपदार्थशुद्धिरुदिता तास्वप्स्वदेवार्पितं नि
टी० १ कावेरी २ अतनोः कामस्य बाणाः पक्षे अतनुर्महान्वायुः ३ पल्लविते सर्थः ४ नद्यां ५ वस्त्यं वसतिश्च ६ स्त्रीसमुदायः ७ अगस्त्य ८ प्रसृतिमितामिव स्वल्पां कुर्वंति ॥

क्षिप्तंनिशिरक्षितंशुचिहविर्भस्येतवेत्याक्षपतिः ।। त्याज्यंशास्त्रनिषेधतस्तदितिचेत्साज्यंसतैलंचतन्नोज्यंपर्युषितंस्मरंतियदतोयोज्यंनत्तद्
वर्णैः ।। ५४ ।। पातिव्रत्यमुपेत्यनित्यमनघाचारावदातात्मनां चोली नायदिकंचुकीनकुचयोर्मालीमसीकाततः ।। नारीणांस्फुरतोपयोग्यवयव
स्पष्टीकृतिर्दोषइत्यकंचेदधरापिधानमपिकिंनस्यात्सदावाससा ।। ५५ ।। पार्श्वतोवलोक्यसश्लाघम् ।। अस्यदेवस्यभाग्यवत्तारवल्वियत्ता
परित्यक्ता ।। यतोत्र ।। मणिमयफणितल्पेमल्लिकापुंजकल्पेशमिततजगदभ्रांसंश्रयन्योगनिद्राम् ।। देहरकुहरवर्तीदेवताचक्रवर्तीदलि
तदरितवाणेदृश्यतेकुंभकोणे ।। ५६ ।। अंतर्नागिरिकिंजनतामवेक्ष्यसशिरःकंपम् ।। स्नात्वात्वासहस्रकृतांजलेशुचितमाभूत्वाजपादिक्रमैर्दु
त्वाग्नौचहविःकृतैनरगिरांकृत्वाचपारायणं ।। नत्वाशांईश्वरंभवामयहरंस्तुत्वाचतंभक्तितःश्रेष्ठाःकालममीक्षिपंतिबहवःश्रीकुंभकोणा
द्विजाः ।। ५७ ।। इतश्च ।। कुटीषुगोपीरुचिरासुयोकेभूनटीषुगोपालइतिश्रुतोचरत् ।। अकंपकारूप्यमुपेत्यमोदतेसचंपकारण्यमगण्य
वैभवः ।। ५८ ।। अत्रकिलराजगोपालपादकमलमुपाश्रयतःसाधुजनस्येत्थमनुसंधानम् ।। कोपाटोपदशाविशालपरुषालापादिरूपाशुभ
व्यापारस्थगितार्थिलोकहृदयेभूपालपौरोरलम् ।। तापाविष्टसकृत्प्रपन्नजनमुक्त्यापादलेदीक्षितपापानामपनोदनायकुहनागोपालमे
वाश्रये ।। ५९ ।। कृ० ।। अत्रापिममाविरोधएवप्रतिभाति ।। यतः ।। न्यस्तपादःसुमनसांशीर्षेषुमधुहायहो ।। मुरारातिर्हरिस्फोपिचंपकारण्यमा
श्रितः ।। ६० ।। वि० ।। विरुद्धानामपिसहावस्थितिसंपादकेदेवेषास्फुटेवकानामविरोधकथा ।। यस्मिन्विलोचनतपासहपुष्पवंतौपर्यंकताहन
तयाफणिपक्षिराजौ ।। तेजस्विनौप्रमुदितौस्थितिमाश्रयंतेतस्मिन्नहोभगवतिक्वविरोधगंधः ।। ६१ ।। इतिपरिक्रम्यावलोक्यप्रांजलिः ।। प
रिगतसहकारैः प्रांशुभिर्नारिकेलैर्दिनकरकरधारादुष्प्रवेशांतरेभ्यः ।। चुलकितदुरितेभ्यश्चोलदेशस्थितेभ्योनमइदमखिलेभ्योनाथस्थ
लेभ्यः ।। ६२ ।। कृ० ।। भवतुवैवैतेषुनमस्कर्तृता ।। ।। टि० ।। १ आकाश २ वेदानां ३ यमुना ४ दूराजभिः ५ दैत्यमकरंदश्च ६ चंद्रसूर्यौ ७ अन्नचौर्यपरैः ।। ।। ।।

स मम मुदे नल का दि देवार यो पन्नी वि दूराचाराना लो क यतो न भवति न मश्चि कीर्षा॥ तथा हि॥ वार स्त्री कुच मर्दि भि र्विनर पत्य घ्यो दि दग्र करे स्त
द्दिरि रग्न भासि ते श्व वरते जे ल्पति मे श्रा नमी॥ द्रव्यं देवलका हर त्यच कितो दे वस्य तत्पूजि तास्वेता सक प्रतिमा सक हे तभवि त्वा कि देवता सन्नि धिः॥
॥६३॥ किंच॥ आघाता वत पुण्य यो वत क चा नो क मसे ध्यादि के यैर भ्यस्त मभूद सभ्य वचनं न त्वेव वेदा क्षरम्॥ अध [illegible] ये परे दुर न्वय भवैः सूदैर
मी भिः कृ तान्य न्नादी नि निवे दितानि भगवानं री करो त्येष किम्॥ ६४॥ विमृश्य॥ अहो कलि माहात्म्या दखिल जनाना मनि वा यों विवेक विपर्ययः॥
सद्यः स्याद रतो र्पि तानि हर ये सत्त्वौ त रै भूसुरै रन्नान्यत्र न मा न येति विधि वित्सि द्धा नि वृ द्धा अपि॥ देवस्या य त ने स्वदति विभ या ब्रा त्यैः कृ ता नो
दनात स्पृ ष्टा न्दृष्ट जनेन कष्ट मखि ले दृ ष्टा न शिष्टा त्हता न्॥ ६५॥ वि०॥ मा दृशे भ्यो हि दिव्य क्षेत्र म हात्म्य वेदि भ्यो भवदी यमत्र दूषणं न रो चते॥
य तः॥ अप स्न व स्त्रा नाद चित क्र चिता शालि वपुषो विनी ताः स्वे शा स्त्रे विगत वृ जि नाः पूजक जनाः॥ परित्रा तु लो का न्विधि वदप तं द्रो नु विद धते प
वि त्रैर न्नाद्यैः परम पुरुषाराधनम मी॥ ६६॥ आकर्ण्य ता मिद मपि यद भ्युपगम्या प्य भि धास्या मि रहस्यम्॥ विधिवद विधि वद्दा भक्ति तो भक्ति
तो वान्न न्नक्र चिर शूद्रै र्विवो नाथ मर्चे त्त्वि हस्या ः॥ अनु दिन मुप याते र्च मा ना सक्र दे वैर सुचिर जि तमूर्ति र्व्या प्ति कस्या स्ति कस्य॥ ६७॥ इदं चाव धे
य॥ केचि च्च त्र धरा परा धच कि ताः क्ष्मा पाल भीताः परे श्र द्धा तः कति चि त्प नं खव हिताः शृधा श्च दिव्ये हविः॥ अथ न्यस्त मि दं मुदे व भग वा
नालो कनैः स्वी करो त्यह ः संहर णास्य या च्च त्वि दं प्राश्नंति भाग्यो त्तराः॥ ६८॥ पुश्य ता वत्स्वा नुभव सि द्दो प्र कर्ष निक षौ भगवदा यते न त दिन
स्थ ल पमि क ल्पित यो रन्न योः॥ उपस्कारै स्फारै रुप चित रसा मोद भरम प्य वे सन्न गे हे कृ तम न तिभो ग्यं बुधजनः॥ अभूयः संस्कारि ण्यपि
हविषि दे वा लु पभवे त्व नल्प भाग्य त्व पुन रघ हरत्वं च म नुते॥ ६९॥ इदं च बो द्धव्यं॥ देवा गार नि षे विणः कि ल जना दु ष्वं तु शु द्ध नु वा तेमी
स्वा मिप रि ग्रहे ण नि यतं मान्या म नीषा जुषाम्॥ ॥टी०॥ १ पाककर्तारः २ सात्विकगुणवद्भिः ३ संस्कारहीनः ४ विष्णुः ५ भाग्यशालिनः ६ बहुभिः ७ मन्यते ॥ ॥

प्रायेणाश्रयगौरवेण लभतेहीनोपिमानार्हतांकुब्जः क्लीवमुखोजनोपिभजतेपूजांहिराजाश्रयात्॥७०॥ इत्यन्यतः परिक्रामन्नग्रतोविलोक्यसहर्षं
सांजलिबंधम्॥ पांतुपातकिनोजनानशरणान्पातुंतमःसागरंयातुंपातुपुरीमरीन्रणमुखेजेतुंदशास्यादिकान्॥ नेतुंभूतनयांमुहुर्विरहि
णीमेतुंयशःश्लाघ्यतांदातुंश्रीमच्चराघवेणरचितंसेतुंनमस्कुर्महे॥७१॥ हंतकठिनानामप्यनुबंधुजनेप्रीतिरतिमहती॥ यतः॥ लंकापुरःपंक्तिमु
खेनरुद्धांभूमिंस्तुतांभूमिभृतोनुबंधात्॥ पतिंपुनःप्रापपितुःपयोधौसेतूभवंतःस्वयमाप्लुवंति॥७२॥ निरूप्य॥ पयोधिमध्येप्लवमानमूर्त्तयस्तरं
गवेगार्पितफेनचिन्हिताः॥ हसंतिकिंमंदरमंतरर्णवंनिमग्नमेतेनलसेतुभूधराः॥७३॥ पुनर्विमृश्य॥ लंकापुरावासिरघूद्वहारिसंपर्कपापादि वसिं
धुराजः॥ सपक्षभूभृन्निबिडांतरोपिविपक्षभूभृद्भिरबंधिकष्टम्॥७४॥ शुद्धाःसंश्रितधर्मसेतवइमेसोढोग्रवर्षातपाःस्थित्वासिंधुजलेसदाक्षिति
भृतोघोरंतपःकुर्वते॥ नृत्यंतीरिहनित्यमेवलुलितास्तीरस्थैरतन्वाशुगैर्लावण्यंदधतीःकदापिनचलंत्यालोक्यवीचीरमूः॥७५॥ क्षणमपिध्या
यन्अंजलिंबध्वा॥ अस्तोकदृषदिरपिवारिधिरेषयस्मात्त्रस्तोविभर्त्तिविपुलोपलसांद्रसेतुम्॥ गोपायतेदुरितवंतिजगंतितस्मैकोपायतेरघुप
तेमहतेनमोस्तु॥७६॥ कृ०॥ साक्षेपम्॥ काकुत्स्थकोपचकितःकमितानदीनामासीद्यदागुरुनगप्लवनार्हतोयः॥ शक्यस्तदैषतरितुंहरिभिःपदा
भ्यांकिंवाफलंकथयसेतुकृतिश्रमस्य॥७७॥ विम्बा०॥ तत्कथितमेवमयाभवतातुनसम्यगवधारितम्॥ शृणुतर्हिपुनःसावधानम्॥ अंभोराशिं
वानरौघपंक्तिस्येवव्याजीकृत्यराजीवनेत्रः॥ अंहोराशेर्लंघनार्थंनराणामंभोराशौसेतुमुच्चैरबधात्॥७८॥ पुनर्निरूप्य॥ नसागरोसौनभएवफेनव्र
जानचामीविपुलोडुवर्गाः॥ नसेतुरेषोपिनिशाचराणांनृपातकानामपिधूमकेतुः॥७९॥ पश्यात्रजलचरभ्रमचमत्कारः॥ गजेन्द्रबुध्यानलसेतु
शैलान्ग्राहाग्रसंतेजलधौवसंतः॥ तद्ग्रासजातासमुत्थदंष्ट्राव्याधाःप्रधानंतियथागतंते॥८०॥ पुनर्विचिंत्य॥ डिंडीरखंडान्वपांडुराभंद्राघिष्ठ
मुच्चैःपरिणाहवंतं॥ काकुत्स्थसेतुंकलयेगुणाढ्यंधौतोत्तरीयंधृतमर्णवेन॥८१॥ १पक्षरहिताःशाबकाश्चरकामबाणैःबहुभिर्वायुभिः२ सौंदर्यंसारत्वं ४ विशालता ॥ ॥

।-द्र
२८

यद्व॥ चिरादूरा भूरिभरार्तमूर्तिर्हरिस्तकारि स्ववर्णितनैजकृत्यः॥ अमसपायार्णववारिशीते शेते स किं सेतुमिषेण शेषः॥८२॥ विमृश्य सश्लाघम्॥ यः पु
ण्यपापद्वयकञ्चुके साधनतां गतः॥ स सेतुर्नैकधंशक्तः पापपञ्चकभंजने॥८३॥ दूतिपरावृत्यान्यतो वलोक्य सामोदम्॥ तापं विलुंपति नृणामिह ता
म्रपर्णीत्सारब्धावद्धनघद्वानलजृम्भणोत्थाम्॥ पाथोनिधेस्त्रिजगतिप्रथितो वरोधो रोधोल्लसत्परमहर्षमहर्षियूथः॥८४॥ तदभ्यर्णं निर्वर्ण्य॥ चकास्
स्ति कुरुकापुरी शुचिनिता ताम्रपर्णीतटे विरक्तपरिपङ्क्तिमत्रियुगभक्तिभिर्वैष्णवैः॥ दृढव्रतशठारिगुरोर्वकुलसंपतद्भ्रमरध्वनिद्विगुणजृम्भणद्राविडवे
दघोषोज्ज्वला॥८५॥ अत्रत्यानां हरिभृत्यानामित्थमनुसंधानम्॥ परिदृष्टवते सहस्रशाखोपरमां द्राविडसंहितां हिताननः॥ गुरवे करवाम नित्य
मस्मै शठकोपाय महर्षये प्रणामान्॥८६॥ अंचाममिंचातरुमद्भुवंतं पंचामरद्रूनवधीरयंतम्॥ शठारिसेवंतं किल यस्य मूले तपःफलं किंचिददं
चितं नः॥८७॥ दिशन्नर्थिनां नाममृतात्मकं फलं विलक्षणो भाति स तिंतिणीतरुः॥ सहस्रशाखं द्राविडागमं सृजन् सपस्य मूलं समुपाश्रितो मुनिः
॥८८॥ हरिमिव कृतविवरणं वकुलाभरणं वृणीमहे शरणम्॥ ध्येयं यं विदुरार्या मुमुक्षुभिर्यत्स्वबंधमध्येयम्॥८९॥ तस्मिन्नातिर्मस्तकदृश्या शठारे
र्मायेतरश्रीरिकृ यस्य गाथाः॥ मह्यं पदे हृत्प्रथयंति दिव्ये पदे हेमन्थादटू तिप्रगीतम्॥९०॥ कृतदुरितनिरोधानां कलितक्षतिमौलिभावबोधानां
॥ वशीतरमानां गाथानां न सम्भापि समा शठारिगाथानाम्॥९१॥ जनानुद्दिश्य॥ कठिनशठनरेन्द्रस्तोत्रकान् श्लोकपाशान् जठरपिठरपूर्त्यै जातु मा
संगदिष्टाः॥ त्रुटितहृतमस्केमाच संस्कारकूपे पठत शठजिदुक्तीः रश्रमानीतमुक्तीः॥९२॥ कृशानु मामंत्र्य॥ ननु शठकोपायत्वं प्रणतिप्राप
भावुकोपायत्वम्॥ विमठमते कुरुकायान्निरसितुं महो विराजते कुरुकापुराम्॥९३॥ किंच॥ बकुलाभरणीयानां गाथानां सन्मुखेन भरणीयाना
न्॥ हरिगृहमध्ये नोऽस्वरेण पुनते प्रपंचमध्येतारः॥९४॥ सश्लाघं॥ विरक्तेरास्थानी मधुमथनभक्तेर्नटनभूर्विमुक्तेर्निश्रेणी सुकृतपरिपक्तेः फलमसौ॥
टी० १ पापौ कोटरशमूर्भावयणः पंचमहापातकानि स्वल्पानि पंच २ अन्वारितिर्नहरीतितद्देशप्रसिद्धिः ३ विष्णुः ४ धिकुर्वंतं ५ एतन्नामकपुर्याः ६ उच्चस्वरेण ७ राजधानी ८ रंगभूमिः॥

प्रपत्तेरुद्यानस्थितिरकृतकोन्के: प्रियसखीचिदंकूरसोणीबकुलधरवाणीविजयते ॥९५॥ समंतादावली कायसानंदम् ॥ कृशानुमुद्दिश्य ॥ अभ्य
स्तवेदमौलिभ्यः सद्भ्यः स्तुत्यवृत्तस्या ॥ कुरुकापुरवासिभ्यः कुरुकामनमस्क्रिया: ॥९६॥ कृ० ॥ सत्यमेवं ॥ तथापि पुनरतिपतितेश्रुतिस्मृतयो
यतयोपि कतिचिदत्रवर्त्तते इतीनभातीहमाननीयता ॥ तथाहि ॥ नसंध्यास्नानं तिसृषुन कमंडलुभिधृतिर्नचातुर्मास्याद्विव्रतमपि न भिक्षा
टनविधि: ॥ नलिप्सायास्त्यागो नपरिपठनंचोपनिषदां यतित्वं तन्नैषां श्रुतिमतमतिक्रम्यचरताम् ॥९७॥ नकेवलमेतावदेव भ्रूशुतावदन्यदपि
॥ संन्यासाश्रममाश्रितोपि सकलव्यापारलोपात्मकं कैंकर्यंचपलो हरेरपदिशन्द्राग्राजधानीं विशन् ॥ अर्थानर्जयति श्रितोजितमठोमृष्टो
न्नमश्नात्यसौ कोमृष्येदिहरामरामतं दिदं कष्टं कलेश्चेष्टितम् ॥९८॥ किंबहुना ॥ अन्यापि अस्ति किमित्तोपिह तेकलोपतः संन्यासिनो विर
धतगृहिणां प्रणामान् ॥ एते नु चेतइह कृतातिवैष्णवासातिस्पत्रशूद्र समतिनिर्मतिहि जोपत ॥९९॥ वि० ॥ सखेमैवंभाषिष्ठा: ॥ इच्छं तुदृंत
यतिन: कतिचिन्नौ घमृजुस्तुभैक्ष्यचरणं कलयंतु मावा ॥ द्वयं घ्रिपंकरुहकिंकरतारताश्चेदं कप्रसक्तिरकलंकहृदां कृतेषाम् ॥५००॥ य
त्पुनरभिहितं फणिवरपर्यंक कैंकर्यपर्यटनमपितुर्याश्रमानुगुणमितितदपि निपुणनिरूपणविरहविजृंभितम् ॥ केत्वनपंकजलोचनकैंक
र्येवपर्यवसीयते ॥ संन्यासिन इह धन्यास्तेहि स्वतउपगतस्पृहाविरहा: ॥१॥ इत्थं हि हेयोपादेयविद उदाहरंति ॥ भोगायैव नितंबिनीपरिण
यो यागाहुति: रव्यातये स्वार्थं पाककृति: कुपात्रविषये त्यागार्थमर्थार्जनम् ॥ स्वाध्यायाध्ययनं प्रतिग्रहकृते वादायशास्त्रश्रमो दुष्ये त्वोदर
पूर्तये यदि हरे: कैंकर्यमाचर्यते ॥२॥ अन्यच्च ॥ भूयोदोषैरपि परिवृत: पूरुष: सात्विकानां प्राय: पूज्यो भवति भगवद्भक्तिमासाद्य हृद्याम् ॥१
आक्रांतापि प्रबलभुजगै: कंटकैरप्यनल्पै: किंनाहृत्यासुरभिकुसुमा केतकी भाग्यभाजाम् ॥३॥ इत्यन्यतोभिक्रामन् समंताद्वलोक्य सां
नलिबंधम् ॥ क्रियासार्थितवेदेभ्योग्राह्यपद्भ्य: कृतीर्वदृन् ॥ ॥टी०॥ १ अतिक्रांतश्रुतिस्मृतय: २ अनिदु:स्वाङ्गारोपं ३ लेष: ४ विष्णु: ५ भ्रमंति ६ स्वाज्यग्राह्ये ॥१

पांड्यचोलनिवासिभ्यः पंडितेभ्योनमोस्तुवः ॥४॥ कृ० ॥ सत्यंपुनर्मत्यमराणामप्येषांनरोचतेनमस्क्रियायदेषु मिथ्यावादिन एवबहुलमुपल
भ्यंतअमीखल्वप्रामाणिकमप्यर्थंदूरीकृत्याप्रामाणिकमर्थमुरीकुर्वंति ॥ तथाहि ॥ प्रत्यक्षगोचरमशेषमपिप्रपंचंमिथ्येतिमाप्यिनइमेप्रतिपा
दयंति ॥ सर्वप्रमाणसरणीमतिवर्त्तमानंब्रह्माप्यतिचपरंवतनिर्विशेषं ॥५॥ पुनःसरोषंहंतब्रह्मैवबंधवदिमेब्रह्मणेपिपरस्मैद्रुह्यंति ॥ यत्तः
॥ यदेवसर्वेस्समपास्तदोषंभवार्तिहारिश्रुतिमागमोते ॥ अज्ञंपरंब्रह्मतदेवभुंक्तेसंसारतापानितिसंगिरंते ॥६॥ नकेवलममीपरस्मैद्रुह्यंति ॥
किंतु ॥ तत्समाप्तेभ्यःश्रुतिभ्योपिपतः ॥ मिथ्यार्थोवेदकत्वाच्छ्रुतिषुकुमतिभिःकर्मकांडेनिरस्तप्रामाण्यंब्रह्मकांडेसहगुणवचनैःशेषितोब्र
ह्मशब्दः ॥ मिथ्याथास्मिन्विभक्तिः प्रकृतिरपिपरंब्रह्मनैवाभिधत्तेवाच्यत्वानाश्रयत्वात्कथमुपनिषदांमानतांजानतांते ॥७॥ परमेतेश्रुतिभ्यो
नद्रुह्यंतिकिंतुशारीरकायाअपि ॥ पराशरसुवाशास्त्रंतत्रज्ञानायनिर्मितंअसमंजसतांनीतमहोतब्रह्मवादिभिः ॥८॥ किंच ॥ यादृशःस्वभ
वः सेर्वेश्वरस्तद्विपरीतमेवमुशंतिविरुद्धमतयएते ॥ सर्वज्ञमज्ञइतिसर्वपदाभिधेयंकस्याप्यवाच्यइतिसर्वमहागुणानां ॥ स्थानंचनिर्गुण
इतीदृसमस्तवेदवेद्यंत्ववेद्यइतितंजगदीशमाहुः ॥९॥ किंबहुना ॥ विविधदुरितव्रातस्फीतस्थिरव्यसनाकुलादतिमितमतेर्जीवादेवाभि
दांपरमेशितुः ॥ अपगतपरिच्छेदामोदांबुधेरुपगच्छतामशकशिशुकाभेदोनस्यात्कुतोमदहस्तिनः ॥१०॥ अपरंच ॥ दृश्येमिथ्यादृष्टि
कर्तापिमिथ्यासेषोमिथ्येस्वेषाधीरमीषा ॥ साधिष्ठानोशेपिकिन्नेतिचिंता साधिष्ठानांपीडितानामुदेति ॥११॥ विभावयस्यमेवंमहीसुरदूषणेषु
विनूभिष्ठाः ॥ पारंपर्यत आगतोनिजकुलेपंथानह्रातव्यइत्यहोत्तंपरिगृह्यदृतंजगतोमिथ्यात्वमाचक्षते ॥ अध्येतुनिगमानशेषुतइमान्कर्माणि
निर्मातुमप्यास्तिक्याच्चतुराननिकाममितरेकेवावदेतादृशाः ॥१२॥ किंच ॥ श्रुतीरध्येतारःकिमपिवदितारःप्रतिदिनंक्रतूनांहर्त्तारःकिमपिजपिता
रोमिनुगणं ॥ ॥टी० ॥ १गुणशून्यं २दुर्ब्राह्मणाः ३वेदांते ४अभिधेयशून्यासंस्कारकार्याभावात ५प्रामाण्यं ६तर्कयंति ७अधिष्ठानसहिते ८उत्तमानां ९वाच्यः १०संपादयि
तारः ११मेकः ।

अमीस्मार्तास्त्रात्स्वचिरचयिताशेविधुनुतेऽस्तनेरप्रामाण्यंप्रसजंदनत्तुष्ठापकतया॥१३॥ वृ०॥समंतादवलोक्यनिरुक्तला अमीविषयाः शैवप्रचुर
तयानश्लाघामर्हंति॥अत्रह्नितत्वहितपुरुषार्थोनुपपन्नावस्थिता नभिदधानाः शैवाविदुषोपिविमोहयंति॥ तथाहि॥ मदनजनकेषी
तातंकेमहागुणसेवधीपरमपुरुषेनित्यासक्ताकृतिंकमलामिव॥ बतपशुपतौभूलोपेतौमनोभवेदाहके विहितहृदयांशैवाजलंत्यभाग्यहता
इव॥१४॥सूरादारोग्यमिच्छेल्लक्ष्मपिहुतवहात्संपदुल्लासमिच्छेदीशाज्ज्ञानमिच्छेदनवधिविभवंमोक्षमिच्छेन्मुकुंदात्॥इत्याद्याः सत्यषा
वादिमुनिभणितीराकलय्यापिविष्णोः सेवांशैवास्त्यजतीवतभवहतेयेभावयंतेभवंते॥१५॥अपिच॥तद्विष्णोःपरमंपदंहितमसःपारेसदाप
श्यतासांद्रंसूरिगणेननिर्मलमहानंदात्मकंशाश्वतं॥अप्रेमतदुमेसमेतमनिशंवेतालभूतालिभिर्लोकेभीकरमंचितुल्यवसितामाहेश्वरंनश्वरं॥
॥१६॥वि०॥सत्त्वेगुणग्रहकुतूहलीभूताः॥निस्पंकर्मसमानयंतिनिगमानशास्त्राणिचाधीयते संतर्प्यंतिचसप्ततंतुनिचयंधिन्वंतिभक्त्यातिथीन्
॥सार्वज्ञ्यंचकमवंयंतिशंचपःशीकाः सदैवादरात्स्वामीदृशाधर्मणांकतिपयेदोषाविषत्वानकिं॥१७॥ अन्यच्चश्रोतव्यं॥स्मरहरपरिचर्यासोऽप्र
तंतन्यतेयाजनयतिहरिभक्तिंहंतजन्मान्तरेसा॥शमितदुरितवर्गसाच्चसूतेपवर्गकृतइवफलहानिःकुर्वताशार्षपूजाम्॥१८॥ परंतु॥साकृष्णभ
क्तिर्विनतातिभक्त्याविष्णुर्विहेषलवासहिष्णुः॥तएवधर्मायभवंतिदाराःकदापियान्याभिमृशंतिजाराः॥१९॥शेषशायिद्वेषएवहिमूर्ध्नाभिषिक्तो
दोषःपुरुषाणां॥पशुय॥ नास्तिकस्यमावहतिनारकमातनोतिप्रौढीनिहंतिपरिलुंपतिसंपदंच॥आयुःक्षिणोत्यपचिनोतिचसर्वदोषान्दूषो मुकुं
दविषयोविषयोगतुल्यः॥२०॥वृ०॥तथ्यमेतत्तथाप्यवैदिकव्रतेष्वेवप्रयततांशिवभक्तिमभिनयतांपाषंडविशेषाणामेषांवेशएवभीषयति
हृदयं॥तथाहि॥श्रिताभव्यमार्गाश्चिताभस्मपुष्यच्छिटाल्लजटालास्फुटालापशून्याः॥श्मशानाग्निसंस्था दृशानिर्दहंतःपिशाचाइवामी
१प्रसक्तं २संसारनिवृत्त्यै ३अनिच्छंतः ४युक्तं ५[illegible] ६तर्पयंतिभोजनादिना ७प्रसिद्ध ८पोषयति ९मुकुंदसंबंधी १० अमंगल ११अत्यारक्तपेत्यर्थः॥ ॥

दिग्भ्रमसुभ्रमेति॥ किंचैषामतिजुगुप्सिता रीतिः॥ पर्वीकृत्यगिरीशांसिध्यारहिताश्चमानहीनाश्च॥ इच्छंत्यधिगंतुमिमेधनंजयलिंगदर्शनेनैव॥२१॥
भमोघवाच॥ दीर्घवक्रनरवरंरवरकल्पाग्रहूरंतद्द्भवबाहुयुगं ते॥ शौचमाचरितुमप्यसमर्थानीचबुद्धिहृदयाविहरंति॥२२॥ वि०॥ विमृश्य सरवेगु
णग्राहिणा नैतेपिदूषणीयाः॥ शीतोष्णजृंभणसहेषु जितेंद्रियेषु कष्टोपवासपरिशुष्ककलेवरेषु॥ पुण्यस्थलाटनपराकृतकिल्बिषेषु जानीहि का
नपिगुणान् जटिलेष्वमीषु॥ इत्यन्यतो वीक्ष्य साशोकं॥ क इमे पुस्तकहस्ताः कल्पएवोत्थाय ततस्ततः पर्यटंति॥२३॥ कृ०॥ निपुणमवलोक्य सप
रिहासं॥ ज्योतिःशास्त्रमहोदधौ बहुतरोत्सर्गापवादात्मभिः कल्लोलैर्निबिडे कणान् कतिपयान् लब्ध्वाकृतार्थाइव॥ दीर्घायुः कृतसंपदादिक
थनैर्दैवज्ञपाशा इमे गेहंगेहमनुप्रविश्य धनिनां मोहं मुहुः कुर्वते॥२४॥ किंच॥ विलिखति सदसद्वा जन्मपत्रं जनानां फलति यदि तदानीं दर्शय
त्यात्मदास्यं॥ न फलति यदि लग्नं द्रष्टुरेवाहमोहं हरति धनमिहैवं हंतदैवज्ञपाशः॥२५॥ अपिच॥ प्रमोदे खेदे वा प्रसुपनमतिपुंसो विधिवशान्म
मैवंप्रागेवाभिहितमिति मिथ्या कथयति॥ जनानिष्टानिष्टाकलनपरिहारैकनिरतान् सोमेषा दीनान् परिगणनयैवं भ्रमयति॥२६॥ अस्तु तावत
थ्यवादीदैवज्ञस्तथापि तस्य यातहूचः श्रवणं॥ तथाहि॥ अस्फुरव मथ सुखं वाकर्मणां पंक्तिवेलास्विह हि नियतमेते भुंजते देहभाजः॥ तदिह पुरत
एषग्राहैमौहूर्तिकैश्चेत्कथय फलममीषां मंत्रतः किं ततः स्यात्॥२७॥ वि०॥ ऐहिकामुष्मिककर्मारंभोपयोगिनो नोपालंभमर्हंति ज्योतिर्विदः॥ शृणुता
वत्॥ न दैवं नैपित्र्यं चकर्मावसिध्येन्न यत्रास्ति देशो न तुज्योतिषज्ञः॥ न तारा न वारा न वा नागृह्णाणां नतिथ्यादयो वायतस्तत्र बुद्धाः॥२८॥
यच्च समर्थितं मौहूर्तिकवचननिशामनं मुधेति तन्निपुणानभणेति॥ भानोः शीतकरस्य वापि भुजगग्रासे पुरो निश्चिते तीर्थानामटने जनस्याव
हतेतापत्रयोच्चाटनं॥ दृष्टेमागवधारिते सति धृते तुष्टे च लाभोभवेत् दृष्टे तु व्यसनेत्र तत्परिहृतिः कर्तुं जपाद्यैः समा॥२९॥ अविश्रंभश्चदै
टी०॥ १अभिप्रायपरं कृत्वा २ अनुमानसिद्धि अघ्रसि यान्यतमी३ सत्कारः अनुमानं च ४अग्निधनंजयपंचेति पृथगपि ५ परिपाकः ६ राहुकेतुभ्यां ॥ ॥ ॥

वद्भुवचनेषु अनुपपन्नः। वृद्धिह्रासौ कुमुदसरहृदः पुष्पवंतोपरागः शुक्रादीनामुदयविलयावित्यमी सर्वदृष्टाः॥ आवि ष्कुर्वंत्यखिलवचनेष्व
न्नकुंभीपुलाकन्यायान्ज्योतिर्नयगति विद्वांनिश्चलमानभावं॥३०॥ इत्थंकिल नीतिविदोविदुः॥ विदैवज्ञग्रामंविबुधविधुरांभूपतिसभांमुखं
शुत्साहीनमनुजपतिशून्यंचविषयम्॥ अनाचारान्दारानपहरि कथंकाव्यमपिचप्रवक्तृत्वौ पेतंगुरुमपिसबुद्धिः परिहरेत्॥३१॥ कु०॥ अ
स्त्वेवमित्यन्यतोपीष्यसोपहास्सं॥ मिथ्यौषधैर्हत मृषाकषायैरसत्यलेहैरयथार्थतैलैः॥ वैद्यादिमेवंवितरुग्गणवर्गः पिंचडभांडंपरिपूरयं
ति॥३२॥ किंच॥ नधातोर्विज्ञाननंनचपरिचयोवैद्यकनयेनरोगाणांतत्त्वावगतिरपिनोवस्तुगुणधीः॥ नथाप्येतेवैद्याद्दितिनरलुयतोजडज
नाननसूनृत्योभृत्याइववस्कहरंतेगदजुषाम्॥३३॥ अपिच॥ कषायैरूपवासैश्चकृतामुल्लाघतांनृणाम्॥ नि… धकृतांवैद्योनिवेद्यहरते ध
नम्॥३४॥ वि०॥ वयस्यविश्वोपकारिषु वैद्येष्वेवंनकलयेथाः॥ पथ्य॥ मैस्तेदुःसहवेदनाकवलितेमग्नेस्वरेतगर्गे तमसा यांज्वरणावकेनचत
नौतीतेहृषीकव्रजे॥ दैनेबंधुजनेकृतप्रलपनेधैर्यविधातुपुनः कःशक्तः कलितामयप्रशमनोवैद्यात्परोविद्यते॥३५॥ किंच॥ माबोधिवैद्यकुम
थापिमहाममत्येषुप्राप्तेषुयोभिषगितिप्रथितस्तमेव॥ आकारयत्यखिलएवविशेषदर्शीलोकोपितेनभिषगेषुनदूषणीयः॥३६॥ कष्टमहोक्त
तोपकारेप्यगदंकारेकृतघ्नएव निर्विवेकोलोकः इत्थंहिकवयःकथयति॥ निर्वृत्ताध्वरकृत्यकृत्विजमहोत्तीर्णापगोनाविकंयुद्धांतंसुभटंच
सिद्धविजयोपोद्धारमासस्थलः॥ वृद्धंवारवधूजनंचकितवोनिर्धृष्टतद्यौवनोध्वस्तातंकचयश्चिकित्सकमपिद्वेष्टिप्रदेयार्थिनम्॥३७॥ कु०॥
विमानमप्युत श्वालयन्॥ अग्रतोवलोक्यसोपालंभंसखेपश्यात्रकवीनामेषांशास्त्रैर्विप्रतिषिद्धांचर्याम्॥ श्रीनाथस्तवनानुरूपकवनांवाणीम
नोहारिणीं कष्टंहा कवयः कंदर्पकुटिलस्यापालसात्कुर्वते॥ दूरोपाहृतसारसैंधवपयोदेवाभिषेकोचितंसंसेकेविनियुंजतेवसमतयःशास्त्रा

१स्थालीपुलाकन्यायेन २देशः ३रोगिवर्गः ४उदरभांडं ५भ्रामयंतः ६नीरोगता ७मस्तके ८म्लाने ९दुःखिते १० शकटाश्वादिपालकं ११ कृपणाः १२ नृपवर्णनपरां ॥ ॥॥

रुवालस्य किम्॥३८॥ किंच॥ स्तवकृन्नबनिबर्त्तके सति हरौ कविः सूक्तिभिः करोति वरवर्णिनी चरित वर्णनं गर्हितं॥ अनीतिरवनीपतिर्वतशुनी
तर्नुमौक्तिकैर्विभूषयति देवतामुकुटभागयोग्यैर्यथा॥३९॥ वि०॥ आंतरध्वांतरवयः कवयस्त्वमानाधिसेव्याः कामं वाचः कतिचिद् फलाः संतु
लोके कवीनां सत्यैवान्यामधुरिपुकथयासंस्तवाल्कामदोग्ध्य॥ वित्तं कामं भवतु विफलं दत्तमश्रोत्रियेभ्यः पात्रे दत्ते भवति हि धनैर्धन्यता भूमिदा
तुः॥४०॥ कल्याणं भगवत्कथाकथनतः काव्यं विधातुः कवेस्तस्यैवांगतया क्वचिद्रचयतः शृंगारवीरादिकम्॥ को दोषो भविता यदत्र कवि
ताशीलैः समाश्रीयते पंथा व्याससवसुंधराश्रुतिभवग्रंथादिषु दिर्शितः॥४१॥ कृशा० नरस्तुते विधातारो न वस्तुतइमेबुधैः॥ श्लाघन्यो याइति
कवीन् शास्त्रे ध्वन्यो विनिंदति॥४२॥ कि०॥ धनचपलसकलपुरुषसाधारणमिदं दूषणमविवेकिभिः कविष्वेव केवलमाधीयते॥ यतः॥
पद्यैर्हृद्यतमैस्तुवंति कवयः प्रायेण पृथ्वीपतीनन्ये तान्स्तुवते वचोभिरचमत्कारैरसारैरपि॥ पद्यारंभणशक्त्यशक्ति विहितो भेदः कवीनां भव
त्यन्येषां च परं नरस्तुतिकृतो दोषश्च सार्वत्रिकः॥४३॥ क्षणमालोक्य सादरम्॥ प्राचेतसव्यासपराशराद्याः प्राचः कवींद्राजयदंचितास्ते॥ गोविंन
वीनापि महाकवीनां पूज्या गुणज्ञैर्भुवनोपकर्त्री॥४४॥ तथाहि॥ माघश्चोरो मयूरो मुररिपुरपरो भारविः सारविद्यः श्रीहर्षः कालिदासः कविरथ भवभू
त्याव्हयो भोजराजः॥ श्रीदंडी डिंडिमाख्यः श्रुतिमुकुटगुरुर्भल्लटो भट्टबाणः ख्याताश्चान्ये सुबंध्वादय इह कृतिभिर्विश्वमाल्हादयंति॥४५॥
परंतु॥ संपन्निर्मदभावयोरनघयोः साहित्यपांडित्ययोः सामर्थ्योन्यजनोपकारकतयोः साम्राज्यदाक्षिण्ययोः॥ औदार्यप्रियवादयोश्च कथयं
त्याचारविज्ञानयोः सामानाधिकरण्यमेव विबुधोत्तंस प्रशंसास्पदम्॥४६॥ इदं चावधेयम्॥ प्रणतचरणरेणु विष्णुचित्तौ शठमथनः सरसीमु
निः सभूतः॥ मधुरकविरितोपरे च धन्याः कति न पुनंति जगंति सूक्तिपूरैः॥४७॥ कु०॥ परतो विमानप्रस्थाप्य पार्श्वनो हद्द्ष्टा १ शैपतानाग्रहिणः पुरु
षान्यदेतेन्यर्थमेवन्यायग्रंथरसे तत्तचिंतनेन विश्राम्यंति॥ टी० १ वसुंधराश्रुतिर्लक्षणया वल्मीकं तत्र भवो वाल्मीकिः २ शास्त्रमार्गसंचारी ३ मदसहितं ४ सनकौडस्य॥

तथाहि॥ कर्मब्रह्मविचारणां विजहतो भोगापवर्गप्रदां घोषं कंचन कंठशोषफलकं कुर्वंत्यमी तार्किकाः॥ प्रत्यक्षं न पुनाति नापहरते पापानि पीलु
च्छेदाभ्याससिर्नाप्नोति नैव पात्यनुमितिर्नोपसतारक्षति॥४८॥ किंच॥ हेतुः कोपविशिष्टधीरनुमितो नष्टो नयुग्मं मरुल्लोचो नेति च मोहवादमुखरा
नैयायिकाश्चेद्बुधाः॥ मेषस्याण्डमियत्पलं बलिभुजो दंताः कियंतस्तथेत्येवं संततचिंतनैः श्रमजुषो नस्युः कथं पंडिताः॥४९॥ विशिष्यैव नस्पृश
त्कतार्किकस्य रीतिर्विवेकिनामुपहासास्पदं॥ शृणु तावत्॥ न जिघ्रत्याम्नायं स्पृशति न वदंगान्यपि सकृत्पुराणं नादत्ते न यजन यति किंच स्मृति
मणम्॥ पठन्शुष्कं तर्कं परपरिभवार्थोक्तिभिरसौ नयत्यायुः सर्वं निहितनपरलोकार्थयतनः॥५०॥ अपि च॥ प्रबले रस्तोके :परिचितकुतर्कप्रक
रणाः परं वाचो वश्यान्कतिपयपदौघान्विदधतः॥ सभायां वाचाटाः स्फुरति कटुरटंतो घटपटानलज्जं ते मंदं … मपि तु जिह्नेति विबुधः॥५१
वि०॥ वयस्यविविधोपकारविधायकान्नैयायिकान्मावमंस्थाः॥ शृणु॥ मोहं रुणद्धि विमलीकुरुते च बुद्धिं सूते च संस्कृतपदव्यवहारशक्तिं॥
शास्त्रांतराभ्यसनयोग्यतया युनक्ति तर्कश्रमो न तनुते किमिहोपकारम्॥५२॥ तथाहि॥ प्रायः काव्यैर्गमितवयसः पाणिनीयाम्बुराशेः सारज्ञस्या
प्यपरिकलितन्यायशास्त्रस्य पुंसः॥ वाग्वारंभे वदितुमनसो [illegible] सभायां प्रह्वा जिह्वा भवति कियतीं पश्य कष्टामवस्थाम्॥५३॥ किं बहुना॥ अ
परीक्षितलक्षणप्रमाणैरपरामृष्टपदार्थसार्थतत्वैः॥ अपरीक्षितजंत्रयुक्तिजालैरलमेतैरनधीततर्कविद्यैः॥५४॥ निरूप्य॥ अक्षतल्लेकपाथो
धिरगाधो यस्य वर्धकः॥ अक्षपादोऽतेमस्पृष्टस्त्वकलंकः कलानिधिः॥५५॥ पुनरालोच्य सश्लाघम्॥ ज्ञानाब्धिरक्षिचरणः … भिक्षकश्च श्रीप
क्षिलोऽप्युदयनः स च वर्द्धमानः॥ गंगेश्वरः शशधरो बहवश्च नव्याग्रंथैर्ययैरुध्यत दूमेहदयाधकारं॥५६॥ कृ०॥ अपरत्र न्यो … मयानेनप्रस्थापपनं अय
नो निरीक्ष्यसे पालेभे। मीमांसकाः कतिचिदत्र मिलंति वद्प्रामाण्यसाधनकृतोऽपि न ते भिवंद्याः॥ ॥टी०॥ १ परमाणुसमुदायः २ व्याप्तिविशिष्टप
क्षधर्मताज्ञानविशिष्टः ३ पूर्वोक्तमनाशहयं ४ त्वगिन्द्रियप्रत्यक्षः ५ काकः ६ लज्जते ७ अज्ञातपदार्थसमूहजालैः ८ जयमुक्ति ९ राहुः अज्ञानं च ॥ ॥ ४

उद्घोषितोप्युपनिषद्भिरशेषशेषीब्रह्मैवनाभ्युपगतः पुरुषोत्तमोयैः ॥५७॥ विशिष्यचमीमांसकानांगोष्ठ्यांविश्रुताः शबरादयः शबरादयइवमग
वद्भक्तानांविनिंदनीयाः ॥ तेमीमांसाशास्त्रलोकप्रसिद्धाः सर्वेषांणांसेहिरेनैवसत्ताम् ॥ चैतन्यस्यापन्हुवंदेवतानांचकुर्विश्वंनश्वरंमन्यमानाः ॥ ५८
॥ वि॰ ॥ सखेनिखिलनिगमार्थनिर्धारणबद्धादरेषुमीमांसकेषुमास्मसन्नह्येथाः ॥ शृणु ॥ आदौधर्मप्रमाणंविविधविधिभिदाशेषतांचप्रयुक्तिं
वापर्याधिकारौतदनुबहुविधंचातिदेशंतथोहं ॥ बाधंतंत्रंप्रसंगंनयननपथगातैः सम्यगालोचयज्ञोभिन्नामीमांसकेभ्योविदधदितिभुविकेवादरं
वेदरक्षां ॥ ५९ ॥ पशुपनावद्भगवतद्वजैमिनिशासनंवैदिके सर्वैर्निवृत्तिक्रमणीयं ॥ नैयायिकावानुशाब्दिकावात्रयीशिरःसुश्रमशालिनोवा ॥
वादाहवेविश्रुतिजैमिनीयन्यायोपरोधेसतिमौनमुद्रां ॥ ६० ॥ यच्चमीमांसकेषुदोषोद्घाटनंतदर्शनतः । भगवदनभ्युपगमनं देवतचैतन्यनिन्हव
श्चैषाम् ॥ कर्मश्रद्धावर्धकतत्प्राधान्यप्रदर्शनायैव ॥ ६१ ॥ पुनरालोच्यसबहुमानं ॥ आगमरूपविचारिण्यधिकरणसहस्रमशिक्षितविपक्षे ॥ सम्मिनि
जैमिनियोगिन्यपरज्ञानिहृदयमस्मदीयमिदम् ॥ ६२ ॥ शबरकुमारिलगुरवोमंडनभवदेवपार्थसारथयः ॥ अन्येपिविश्वमान्याजयंतिसंत्राप
माणतंत्रास्ते ॥ ६३ ॥ कृ॰ ॥ अस्तितिविमानमन्यतोगमयन्पार्श्वतोदृष्वासीपहासं ॥ टिट्टाणमुह्यसच्चुहुड्डीसड सोत्तिपतस्झिसिप्रथम
यमिपुवप्रमसहसिवष्ठुनाशुरतङ्रुशच्छोल्पचोत्पादिटि ॥ लोपाव्यौवलिशृद्धिरेचियविभेदधाग्वदापक्केचटेरित्यब्दान्नखिलान्नयतिकतिचि
च्छुब्दान्पठंतःकटून् ॥ ६४ ॥ किंचासूत्रैःपाणिनिकीर्तितैर्बहुतरैर्निष्पाद्यशब्दावलिंवैकुंठस्तवमसमाप्यरचयितुंमिथ्याश्रमाः शाब्दिकाः ॥ पक्कान्नंविवि
धंक्रमेणविविधापूपाग्र्यसूपान्वितंमंदाग्नीनतुरुंधतेमितवलानाघ्रातुमप्यक्षमान् ॥ ६५ ॥ वि॰ ॥ त्र्याभरणेषुवैयाकरणेषुभावान्मास्मकलयतुदोष
शर्वकलयत । कृतदुरितनिराकरणंव्याकरणंचतुरधीरधीयानः ॥ बुधगणगणनावसरेकनिष्ठिकापांपरंजयति ॥ ६६ ॥ पार्तनलेविष्णुपदापगायाःपातं
जलेचापिनयेवयाहं ॥ टी॰ १मतीवपदार्थैःसहाविचाल्प॰ २मएवब्रह्मइति ३लोपं ४ वादयुद्धे ५न्यायरूपेप्रतिबंधके ६ लोपं ७ लेशं ८ पातंनलेतुविविपदद्वयं ॥ ॥ ॥

आवेसस्तिभुवि सूदमागधसूतैरावस्सैतेरागमधोसूजेच॥६७॥ अपिच॥ नृणामनभ्यस्तफणाभृदीशगिरां दुरापा बुधराजगोष्ठी॥ अबुद्धचाप
श्रुतिपद्धतीनां पुद्धास्समेवोद्धततयो धृसार्था॥ ६८॥ तथाहि॥ नांगीकृतव्याकरणोऽप्रधानामपाटवं वा चिरकगाद्धमास्ते॥ कस्मिंश्चिदुक्ते
तुपदे कथंचित्स्वैरं वपुःस्विद्यति वेपते च॥ ६९॥ कु॰॥ साक्षेपं॥ कथंस्तरवेश्वतकोटिपाणिनिगदितमेवव्याकरणमाद्रियंते संतः॥ वि॰॥ पाणि
नीयमेव हि व्याकरणं प्रयोगोपयिकं प्रविशदप्रनीतिकारणमिति तत्रैवादरः पंडितानां॥ तथाहि॥ सूत्रे पाणिनिबद्धकलयन्नुरूपः समुद्धद्द
विस्तृदृश्यं॥ वर्णादीनां धर्मान्बुध्वा विधिवत्प्रयुक्तेसौ॥७०॥ इति विमानं अन्यतश्चालयन्पुरो वलोक्य सखेदमग्रपुष्पदंतसानर्थचापलेन विक्रो
यमाणाम्नायान्॥ आःकष्टमप्रहृष्टाः शिष्टा अपि वित्तचापला विष्टाः॥ अध्यापयंति वेदानादाय चिरायमा[illegible]सि भृतिं॥७१॥ वि॰॥ वयस्य
मैवंवादीः॥ नाध्यापयिष्यन्निगमान्श्रमेणोपाध्यायलोकायदि शिष्यवर्गान्॥ निर्वेदवादं किल निर्वितानमुषी[illegible]हं वतदाभविष्यत्॥ कु॰॥
विरुद्धमिदं भाषितं यद्वेतया येसति नयज्ञाभ्युदयः स्यादिति॥ वि॰॥ अवगच्छतावदेतदविरुद्धमेव॥ नाम्नायज्ञो[illegible]रवेयस्मिन्पनमानतया
स्थितः॥ तस्समागमतःसोपि नाम्नायज्ञो भवेन्न किम्॥७२॥ कु॰॥ पुनरन्यतो दृष्ट्वा सोपहासं॥ पश्यैतान्राजसेवि[illegible]रित्यक्त्वैकहूपसे
रव्यान्स्पृहमौरव्यान्पुरुषान्॥ नैषां संध्याविधिरवि[illegible]नान्युताचोपि सांगोनस्वकाले हवननियमोनापि वेदार्थचिंता॥ [illegible]हेला
नियतमशनेनापि निद्रावकाशो नहोलोकावधितनुभृतां राजसेवापराणां॥७३॥ वि॰॥ दुःसहेषा बहुजनपोषकाणां[illegible]नित्यं॥ [illegible]
भपुषिकलावप्यप्रमत्ताः स्वधर्मादनुदिनमुप[illegible]शानाचरंते बुधानां॥ बहुजनपरिपुष्टो बहुदीप्तास्त एते तनुस्करवमपि हित्वातन्व[illegible]
सेवा॥७४॥ सर्वाणि दिव्यक्षेत्राण्यवलोक्य सांजलिबंधं॥ कृशानुमुद्दिश्य॥ गंगाझरीपरिचितांघ्रिजगन्निदानं रंगादिधामसकृर्चिरात्कृ

टी॰॥ १ वदंति २ जननादारभ्य ३ मरणांतर ४ धनुर्वेदः ५ इंद्रः ६ उपयोगी ७ वेतन ८ नआम्नायज्ञ इति च्छेदः ९ नाममात्रेणसयज्ञः १० अमुभवकुले॥ ॥

वि॰द॰ तत्सन्निधानं ॥ विश्वं स्वस्मै विशङ्कमेव विलोकमानं वेदस्त्ववस्तन मदार्त्तिहराभिधानं ॥७५॥ कृ॰ ॥ नन्वत्र तृतीयचरणार्थो न मत्तः प्रोच्यते ॥ वि

३३ लोचने विभो यस्याविख्याते पुण्यवन्तया ॥ सा स्मात्कृत्तु स्फुटं सर्वशङ्को तिसकथं हृमि: ॥७६॥ वि॰ ॥ सूर्यचंद्रलोचनतया सचमत्कारं चक्रध

रस्तवानायतुभ्यं वक्ष्यामि ॥ शृणु तावदिदं ॥ यस्ता यदसंप्रदायरसिकत्वमयः सहायः श्रियश्चिवारलसपत्नवीक्षितलवश्चक्रेशिप॰

तामायत ॥ यो विश्वे नङ्गिगात्रवान्हिमरुचाप्युष्णांशुना नेत्रवान् कृग्रीवेण च मित्रवान् कुशलवब्रह्मादिभिः पुत्रवान् ॥७७॥ सर्वेसंप्रियव

ऽयमाणे सारभूतमिमं पर्यगृह्णाण ॥ नराः स्फुरा वापशवः नंदिनीपाः पुरुषेण भेष्युना ॥ यतोपि दोषप्रचुरे जगत्यस्मिन् येन मनोविनेवीतसु

कल्याणवि ॥ अभ्युपगम्य ॥ लक्ष्मीयगुणसमृद्धिरूपं वर्णभोगतिः समस्तवस्तूनां ॥ अस्माभिरुपनिषिद्धासिद्धांतस्यैव पूर्वपक्षो कि:

॥७९॥ इति सकलजनानां मीरयतोः कृभंतो मधुमथनपवित्रक्षेत्रसेवां कृतार्थौ ॥ अनुपथि हृदसरव्यौ हंत गंधर्वमुख्यौ निजसदनमगातां

निर्भरानंदसांद्रौ ॥८०॥ सकलकुशलसिद्ध्यै सर्वदेवस्थलेषु व्रजतु भुवि विवृद्धिं वत्सरात्युत्सवश्रीः ॥ अपगतभयरोगैरध्वराणां प्रयोगैः स्वि॰

लसु भं करोतु मस्तकभद्रं द्विजानाम् ॥८१॥ जयतु जगति लक्ष्मणार्यपक्षा जयतु वचः श्रुतिमौलिदेशिकानां ॥ निगमवर्त्म निःसपत्नं जय

तु चिरायमुरारिरंजनाद्रौ ॥८२॥ प्रकाशदोषष्वैरप्यमुष्मिन्ग्रंथे मदीये करुणानुबध्नान् ॥ प्रसादयंतो न कृतोऽनवद्यपरं तु विश्वावसवस्तु संतः

॥८३॥ ॥ इति श्रीमद्वमतभंजननिबंधनव्याख्यातृ तातयज्वभागिनेय वाजपेययाजिश्रीशिष्ट तोर्यामार्यपव्नात्मजस्य आचार्य

तनूभवस्य कवय मकलचक्रवर्ति रघुनाथाचार्यदीक्षिततनयस्य श्रीमद्वेंकटाध्वरिणः कृतौ विश्वगुणादर्शः समाप्तः ॥ ॥ शुभमस्तु ॥ ॥

टी॰ १ सूर्यचन्द्ररूपचक्षुष्मत्त्वेऽपि रोगविशेषवत्तया २ पृथक्पदं कर्म ३ अभ्युदयेच्छुना ४ प्रापयंतो ५ पुरोभागिनः ६ किंतु विश्वावसुसंवत्सरः ३३

वे.द. वाराणसीप्रसादस्य नियोगेन प्रयत्नतः॥ काशीसंस्कृतमुद्रायामङ्कितोयं शिलाक्षरैः॥१॥ श्रीकाशीजीमेंज्ञानवापीकेपूर्वफाटकपरश्रीवि

३४ श्वनाथजीकेपासश्री३पुतमहाराजशिवलालदुबेजीकेमकानमेंकाशीसंस्कृतमुद्रायन्त्रमेंछपीजिनकोलेनाहोयउन्होंनेइसकार्यकेसं

पादकबाबूवाराणसीप्रसाद याकचौरीगलीमेंभाईप्रतापसिंहजीकेदुकानपरमिलेगी॥ मितीचैत्रशुक्ल५ रविवासरेसंवत् १९३१ ॥ ॥ ॥

॥इतिविप्रगुणादर्शःसमाप्तः॥